Barcode - 4990010216675
Title - Patanjala Darshanam
Subject - PHILOSOPHY. PSYCHOLOGY
Author - Bidyabhushana, Ashu Bodha, ed.
Language - sanskrit
Pages - 122
Publication Year - 1907
Creator - Fast DLI Downloader
https://github.com/cancerian0684/dli-downloader
Barcode EAN.UCC-13



17 80 76

PATANJALA-DARSHANAM.

With gloss 'Mani-prabha'

OF

RI RAMANANDA YATI.


EDITED AND PUBLISHED BY

PANDIT ASHU BODHA VIDYABHUSHANA.




CALCUTTA.

PRINTED AT THE GOBARDHAN PRESS



To be had of :—Pandit Jnanendra Vidyasagara. B. A.
Superintendent, Free Sanskrit College.
Ramanatha Majumdara's Street, Harrison-Road P.O., Calcutta.


RMIC LIBRARY
Acc No. 178076
Class No 181 45
PAT
Date 29.11.95
Sl. Card
Class
Cat
Rb Card
Checked

पातञ्जलदर्शनम् ।

श्रीरामानन्दयतिकृत मणिप्रभाख्यवृत्तिसहितम् ।

पण्डितकुलपति-
श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्यात्मजेन
पण्डित श्रीआशुबोध विद्याभूषणभट्टाचार्य्येण
संस्कृतं प्रकाशितञ्च ।



कलिकातानगर्य्याम्
गोवर्द्धनयन्त्रे
मुद्रितम् ।

इ १९०७ ।

প্রকাশক—পণ্ডিত শ্রীআশুবোধ বিদ্যাভূষণ।
২ নং রমানাথ মজুমদারের ষ্ট্রীট, কলিকাতা।
প্রিণ্টার—শ্রীগোবর্দ্ধন পান,
৪৩ নং কটন্ ষ্ট্রীট, কলিকাতা।



Prof. Ashubodha Vidyabhushana

पातञ्जलदर्शनस्य विषयसूची ।

समाधिपादः ।

विषयः	पृष्ठाङ्कस्य	पङ्क्तौ
योगशास्त्रोपक्रमः ...	१	१०
योगस्य साधारणलक्षणम् ...	२	१२
वृत्तिनिरोधे चितः केवलस्वरूपावस्थानम्	३	१५
व्युत्थाने चितो वृत्तितादात्म्यम् ...	३	२२
पञ्चधा वृत्तिनिरूपणम् ...	४	६
पञ्चवृत्तीनां नामानि ...	४	२५
प्रमाणवृत्तिलक्षणम् विभागलक्षणञ्च	५	३
विपर्य्ययलक्षणम् ...	५	१८
विकल्पलक्षणम् ...	६	२
निद्रालक्षणम् ...	६	११
स्मृतिलक्षणम् ...	६	२२
वृत्तिनिरोधोपायः ...	७	८
अभ्यासलक्षणम् ...	७	१६
अभ्यासस्य दृढ़संस्कारनिरूपणम्	७	२२
वैराग्यलक्षणम् ...	८	६
परवैराग्यलक्षणम् ...	८	१८
संप्रज्ञातसमाधेर्विभागलक्षणनिर्देशः ...	८	११
असंप्रज्ञातसमाधिस्वरूपोक्तिः ...	१०	८
असंप्रज्ञातावान्तरविशेषभवप्रत्ययाधिकारनिर्देशः	१०	१६
तवदान्तरविशेषोपायप्रत्ययाधिकारः	११	८

विषयः		पृष्ठाङ्कस्य	पङ्क्तौ
तीव्रसंवेगफलम्	...	११	२२
तस्य मृद्वादिभेदेन विशेषत्वम्		१२	१
ईश्वराराधनस्यापि निरोधसमाध्युपायावेशः		१२	६
ईश्वरस्वरूपनिर्णयः	...	१२	१२
ईश्वरस्य सर्वज्ञत्व निरूपणम्	...	१३	१५
ईश्वरस्य सर्वप्राधान्यम्	...	१४	८
ईश्वरवाचककथनम्	...	१४	१५
ईश्वरप्रणिधानवर्णनम्	...	१५	८
तत्प्रणिधानफलम्	...	१५	१६
तस्यान्तरायाः	...	१६	२
तेषां दुःखाकरत्वम्	...	१६	१७
तदपसारणप्रकारनिर्देशः	...	१७	५
चित्तप्रसादनप्रकाराः	...	१७	१२
प्रसन्नचित्तस्य स्थिरत्वोपायाः	...	१८	१
उपायान्तरम्	...	१८	१०
चित्तस्थैर्य्यावान्तरफलम्	...	१८	१८
वीतरागविषयत्वं चित्तस्य	...	१८	५
स्वप्ननिद्राधारत्व कथनम् चित्तस्य		१८	८
अभीष्टध्यानावतारः	...	१८	१३
चित्तस्थितेर्ज्ञापकम्	...	१८	१८
लब्धस्थितिकस्य चित्तस्य समापत्तिस्वरूपावतारः		२०	३
सवितर्कासमापत्तिलक्षणम्	...	२०	२१
निर्वितर्कासमापत्तिलक्षणम्	...	२१	१२
सविचारानिर्विचारासमापत्तिलक्षणम्		२२	५
सूक्ष्मविषयत्वावधिनिरूपणम्	...	२२	१८

विषय	पृष्ठाङ्कस्य	पङ्क्तौ
समापत्तीनां संप्रज्ञातसमाधिप्रकारः ...	२३	११
अध्यात्मप्रसादकथनम् ...	२३	१८
ऋतम्भराप्रज्ञानिर्देशः ...	२३	२४
तस्या विशेषविषयत्वनिरूपणम् ...	२४	५
निर्विचारासमापत्तिसंस्काराणां स्वेतर-संस्कारविरोधः ...	२५	३
निर्बीजसमाधिसमयाकारनिर्णयः	२५	१४

साधनपादः ।

क्रियायोगाकारनिर्देशः ...	२६	१२
क्रियायोगफलम् ...	२६	२१
पञ्चक्लेशनिरूपणम् ...	२७	६
क्लेशानामविद्योद्भवत्वम् ...	२७	१०
अविद्यालक्षणम्	२८	१
अस्मितानिरूपणम् ...	२८	१६
रागनिर्णयः ...	२८	२३
द्वेषनिर्णयः ...	२८	४
अभिनिवेशप्रकाशः ...	२८	७
सूक्ष्मक्लेशहानोपायः ...	३०	४
तत्र स्थूलानां हानोपायः ...	३०	८
कर्माशयस्य क्लेशमूलत्वनिरूपणम्	३०	१८
कर्मणो विपाककथनम् ...	३१	८
विपाकफलम् ...	३१	२३
विचारदुःखात्मकत्वात् सुखस्यापि हेयत्वकथनम्	३२	६
अनागतदुःखस्य हेयत्वम् ...	३३	१३

विषयः		पृष्ठाङ्कस्य	पङ्क्तौ
हेयहेतुप्रकाशः	...	३३	१७
दृश्यनिरूपणम्	...	३४	२
तदवान्तरविभागोद्देशः	...	३४	१६
द्रष्टृनिरूपणम्	...	३५	७
दृश्यद्रष्ट्रोः अङ्गाङ्गिभावः	...	३५	१३
मुक्तेतरसम्बन्धात् दृश्यस्यानादित्वनिर्देशः		३५	१८
संयोगनिरूपणम्	...	३६	७
संयोगहेतुनिर्देशः	...	३६	१७
हानात् कैवल्यनिवेशः	...	३७	४
मोक्षहेतुनिर्देशः	...	३७	१०
जीवन्मुक्तस्य सप्तधाज्ञानवैभवकथनम्		३७	२०
प्रज्ञासाधनकथनम्	...	३८	१८
योगाङ्गाष्टकनिर्णयः	...	३८	२
पञ्चयमाः	...	३८	८
सार्व्वभौममहाव्रतकथनम्	...	३८	२०
नियमनिर्देशः	...	४०	८
वितर्कादिषु प्रतिपक्षभावनम्		४०	२०
वितर्कादिस्वरूपनिरूपणम्	...	४१	६
अहिंसोपकारः	...	४२	४
सत्यफलनिर्देशः	...	४२	८
अस्तेयफलनिर्णयः	...	४२	१३
ब्रह्मचर्य्योङ्गतेष्टसिद्धयः	...	४२	१६
स्थिरेऽपरिग्रहे त्रिकालज्ञानम्	...	४२	२०
नियमसिद्धिकथनम्	...	४३	७
अन्तःशौचसिद्धिनिरूपणम्	...	४३	१३

विषयः		पृष्ठाङ्कस्य	पङ्क्तौ
अनुत्तमसौख्यसिद्धिः	...	४३	१८
तपः सिद्धयः	...	४४	१
दृष्टदेवसम्भाषणसिद्धिकथनम्	...	४४	४
समाधिसिद्धिकथनम्	...	४४	६
आसननिरूपणम्	...	४४	१८
आसनस्थैर्य्यकथनम्	...	४५	४
आसनफलसिद्धिः	...	४५	१०
प्राणायामस्य सामान्यलक्षणम्	...	४५	१३
चतुर्विधप्राणायामवर्णनम्	...	४५	१८
चतुर्थप्राणायामप्रदर्शनम्	...	४६	२०
प्राणायामफलम्	...	४७	५
धारणालक्षणनिर्देशः	...	४७	८
निरुद्धेन्द्रियप्रत्याहारः	...	४७	१४
इन्द्रियवशीकारकथनम्	...	४८	२

विभूतिपादः ।

धारणानिर्णयः	...	४८	२०
ध्याननिरूपणम्	...	४८	१६
समाधिनिरूपणम्	...	४८	२४
धारणादित्रयाणां संयमसंज्ञाकथनम्		५०	१०
संयमफलम्	...	५०	१३
संयमभूमिनिर्णयः	...	५०	१८
धारणाद्यन्तरङ्गत्वम्	...	५१	१
एषामेव निर्बीजबहिरङ्गत्वनिर्देशः	...	५१	७
संयमपरिणामप्रदर्शनम्	...	५१	१५

विषय:	पृष्ठाङ्कस्य	पङ्क्तौ
प्रशान्तचित्तस्य निरोधस्थिरत्वनिर्देशः	५२	२
समाधिपरिणामकथनम् ...	५२	८
चित्तैकाग्रतापरिणामलक्षणम् ...	५२	१५
धर्मादित्रयपरिणामोद्घोषः ...	५३	१
त्रिविधपरिणामानुबन्धिधर्म्मिलक्षणम्	५३	२१
क्रमान्यत्वे परिणामान्यत्वकथनम्	५४	११
अतीतानागतज्ञानकथनम् ...	५५	८
सर्व्वभूतरुतज्ञानकथनम् ...	५५	१४
पूर्व्वजन्मज्ञानकथनम् ...	५७	१
परचित्तज्ञानकथनम् ...	५७	२१
साक्षात्कृतौ तद्विषयसाक्षात्कारः	५७	२३
कायरूपसंयमसिद्धिः ...	५८	१४
मरणज्ञाननिरूपणम् ...	५८	२२
मैत्र्यादिबलकथनम् ...	५८	१७
बलसंयमफलनिर्देशः ...	५८	२२
सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् ...	६०	१
चतुर्दशभुवनज्ञानम् ...	६०	१०
ताराव्यूहज्ञानम् ...	६०	१४
तन्नतिविज्ञानम् ...	६०	१८
कायव्यूहज्ञानकथनम् ...	६०	२२
क्षुत्पिपासानिवृत्तिकथनम् ...	६१	५
चित्तस्थैर्य्यसिद्धिः ...	६१	८
सिद्धदर्शनकथनम् ...	६१	१२
प्रातिभात् सर्व्वज्ञत्वम् ...	६१	१६
चित्तसम्बिज्ज्ञानम् ...	६२	१

विषयः		पृष्ठाङ्कस्य	पङ्क्तौ
पुरुषज्ञाननिरूपणम्	...	६२	४
प्रातिभादीनां स्वार्थसंयमफलावतारः	...	६२	१८
पूर्वोक्तसिद्धीनां समाधौ प्रतिबन्धकत्वम्		६३	५
चित्तस्य परशरीरप्रवेशोपायकथनम्	...	६३	१४
उदानजयफलम्	...	६४	१
समानजयफलम्	...	६४	१२
दिव्यशब्दश्रवणोपायकथनम्	...	६४	१६
आकाशगमनोपायनिरूपणम्	...	६४	२१
चित्तस्य क्लेशाद्यावरणक्षयोपायः	...	६५	४
भूतजयकथनम्	...	६५	१२
अणिमादिसिद्धिसाधनोपायः	...	६५	२४
कायसम्पद्वर्णनम्	...	६६	१०
इन्द्रियजयप्रकारः	...	६६	१५
तत्फलम्	...	६७	१
सर्वज्ञतासिद्ध्युपायः	...	६७	१४
वैराग्यात् कैवल्यसिद्धिकथनम्	...	६७	२२
विघ्ननिराकरणोपायकथनम्	...	६८	६
अन्यविधविवेकज्ञाननिरूपणम्	...	६८	११
विवेकज्ञानोद्भवासूक्ष्मविषयविशेषाः		६८	२०
तारकज्ञानलक्षणम्	...	७०	१२
सत्त्वपुरुषशुद्धिफलम्	...	७१	१

कैवल्यपादः ।

जात्यादिकारणविशेषाः	...	७१	२२
प्रकृत्यन्तरपरिणतिप्रयोजकोक्तिनिर्देशः		७२	१२

विषय:	पृष्ठाङ्कस्य	पङ्क्तं
धर्म्मादेः प्रकृतिप्रयोजकत्वाभावोद्बोधः	७२	२
निर्माणचित्तख्यातिः ...	७२	८
भोगानुकूलचित्तनिर्म्माणम् ...	७२	१
निर्मितचित्तस्य मोक्षयोग्यत्वम् ...	७३	२
कर्म्मविशेषाः ...	७३	२
कर्म्मानुगुणवासनाविस्तारः ...	७४	१
व्यवायनिर्बन्धवासनानामप्यव्यवायोपचारः	७४	२
तासाम् अनादित्वप्रकारः ...	७५	२
अनादित्वेऽपि तासां समुच्छेदः	७६	
धर्म्माणां मार्गविशेषपरिणतिः ...	७६	३
धर्म्माणां गुणस्वरूपताभासः ...	७७	१
वस्तुगतैकत्वव्यवहारकारणकलापः	७८	
अर्थज्ञानभेदावभासः ...	७८	१
अर्थस्य ज्ञानसहोद्भूतितिरस्कारः	७९	१
चित्तपरिणामित्वविभावनम् ...	८०	
आत्मनः परिणामित्वाभावः ...	८०	
चित्तस्य स्वाभासत्वाभावः ...	८०	१
चित्तस्य स्वयं प्रकाशत्वे दोषोद्घोषः	८१	
चित्तान्तरदृश्यत्वे च चित्तविशेषदोषः	८१	
अपरिणतायाऽपि चितेः स्वबुद्धिसंवेदनम्	८२	
चित्ते सर्वार्थत्वस्य उपाधिकतानिर्देशः	८३	
चित्तव्यतिरिक्तचेतने कारणान्तरम्	८३	
आत्मज्ञानाधिकारिनिर्णयः ...	८४	
अधिकारिणः चित्तस्वरूपनिर्णयः	८४	
—चित्तः अस्तिवस्तुत्वे कारणम्	८५	

विषयः	पृष्ठाङ्कस्य	पङ्क्तौ
स्नानिनो व्युत्थितचित्तत्वनिराकरणावतारः	८५	१५
परवैराग्योदयात् प्रसंख्याने निरोधः ...	८६	१
धर्म्ममेघात् समूलक्लेशनिवृत्तिः ...	८६	१२
धर्म्ममेघसमये मनोवस्थानिरूपणम्	८६	१५
समाप्तगुणपरिणतिक्रमः ...	८७	११
क्रमलक्षणकथनम् ...	८७	२०
कैवल्यस्वरूपनिर्देशः	८८	४

सूत्राक्षरक्रमसूची ।

	पा०	सू०	पृ०	पं०
अ				
अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्माणाम् ।	४	१२	७६	२०
अथ योगानुशासनम् ।	१	१	१	८
अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्म-				
ख्यातिरविद्या । ...	२	५	२८	१
अनुभूतविषयासंप्रमोषः स्मृतिः ।	१	११	६	२२
अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ।	२	३९	४२	२०
अभावप्रत्ययालम्बना वृत्तिर्निद्रा ।	१	१०	६	११
अभ्यासवैराग्याभ्यां तन्निरोधः ।	१	१२	७	८
अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः ।	२	३	२७	६
अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नो-				
दाराणाम् । ...	२	४	२७	१०
अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ।	२	३७	४२	१३
अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ।	२	३५	४२	४
अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ।	२	३०	३८	८
ई				
ईश्वरप्रणिधानाद्वा ।	१	२३	१२	६
उ				
उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग				
उत्क्रान्तिश्च । ...	३	३९	६४	१

ऋ

	पा०	सू०	पृ० पं०
ऋतम्भरा तत्र प्रज्ञा।	१	४८	२३ २४

ए

एकसमये चोभयानवधारणम्।	४	२०	८१ ८
एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता। ...	१	४४	२२ ५
एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः। ...	३	१३	५३ १

क

कण्ठकूपे क्षुत्पिपासानिवृत्तिः।	३	३०	६१ ५
कर्मशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्।	४	७	७३ २४
कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुः-प्रकाशासंप्रयोगेऽन्तर्द्धानम्। ...	३	२१	५८ १४
कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमा-पत्तेश्चाकाशगमनम्। ...	३	४२	६४ २१
कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः।	२	४३	४४ १
कूर्मनाड्यां स्थैर्य्यम्। ...	३	३१	६१ ८
कृतार्थं प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वात्।	२	२२	३५ १८
क्रमान्यत्वं परिणामान्यत्वे हेतुः।	३	१५	५४ ११
क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः। ...	१	२४	१२ १२
क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः।	२	१२	३० १८
क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्।	३	५२	६८ ११
क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः।	४	३३	८७ २०

	पा०	सू०	पृ०	पं०
क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः । ...	१	४१	२०	३

ग

ग्रहणस्वरूपास्मिताऽन्वयार्थवत्त्वसंयमादिन्द्रियजयः । ...	३	४७	६६	१५

च

चन्द्रे ताराव्यूहज्ञानम् ।	३	२७	६०	१४
चितेरप्रतिसङ्क्रमायास्तदाकारताऽऽपत्तौस्वबुद्धिसंवेदनम् । ...	४	२२	८२	१४
चित्तान्तरदृश्यत्वे बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च । ...	४	२१	८१	२४

ज

जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ।	४	१	७१	२२
जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात् । ...	४	९	७४	२३
जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् । ...	२	३१	३८	२०
जातिलक्षणदेशैरन्यताऽनवच्छेदे तुल्ययोस्ततः प्रतिपत्तिः । ...	३	५३	६८	२०
जात्यन्तरपरिणामः प्रकृत्यापूरात् ।	४	२	७२	१२

त

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ।	४	२७	८५	९
तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ।	१	५०	२५	३
तज्जपस्तदर्थभावनम् । ...	१	२८	१५	८

	पा०	सू०	पृ०	पं०
तज्जमाद्यप्रज्ञाऽऽलोकः ।	२	५	५०	१३
ततः कृतार्थानां परिणामक्रमसमाप्ति-गुणानाम् । ...	४	३२	८७	११
ततः क्लेशकर्मनिवृत्तिः ।	४	३०	८६	१२
ततः क्षीयते प्रकाशावरणम् ।	२	५२	४७	५
ततः परमा वश्यतेन्द्रियाणाम् ।	२	५५	४८	२
ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ।	१	२८	१५	१६
ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते । ...	३	३६	६२	१८
ततस्तद्विपाकानुगुणानामेवाभिव्यक्ति-र्वासनानाम् । ...	४	८	७४	१२
ततोऽणिमादिप्रादुर्भावः कायसम्पत् तद्धर्मा-नभिघातश्च ...	३	४५	६५	२४
ततो द्वन्द्वानभिघातः ।	२	४८	४५	१०
ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ।	३	४८	६७	१
तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ।	१	१६	८	१८
तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ।	१	३२	१७	५
तत्र ध्यानजमनाशयम् ।	४	६	७३	२०
तत्रनिरतिशयं सर्वज्ञबीजम् ।	१	२५	१३	१५
तत्र प्रत्ययैकतानता ध्यानम् ।	३	२	४८	१६
तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का समापत्तिः । ...	१	४२	२०	२१
तत्र स्थितौ यत्नोऽभ्यासः ।	१	१३	७	१६
तदपि बहिरङ्गं निर्बीजस्य ।	३	८	५१	७
तदभावात् संयोगाभावो हानं तद् दृशेः कैवल्यम् ।	२	२५	३७	४

	पा०	सू०	पृ०	पं०
तदर्थ एव दृश्यस्यात्मा।	२	२१	३५	१३
तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्। ...	४	२४	८३	२०
तदा द्रष्टुः स्वरूपेऽवस्थानम्।	१	३	३	१५
तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम्।	४	२६	८४	२५
तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्-ज्ञेयमल्पम्। ...	४	३१	८६	१५
तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्।	४	१७	८०	१
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।	३	३	४८	२४
तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्।	३	५०	६७	२२
तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः।	२	१	२६	१२
तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः। ...	२	४८	४५	१३
तस्य प्रशान्तवाहिता संस्कारात्।	३	१०	५२	२
तस्य भूमिषु विनियोगः।	३	६	५०	१८
तस्य वाचकः प्रणवः।	१	२७	१४	१५
तस्य सप्तधा प्रान्तभूमिः प्रज्ञा।	२	२७	३७	२०
तस्य हेतुरविद्या।	२	२४	३६	१७
तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः।	१	५१	२५	१४
ता एव सबीजः समाधिः।	१	४६	२३	११
तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम्। ...	३	५४	७०	१३
तासामनादित्वं चाशिषो नित्यत्वात्।	४	१०	७५	२०
तीव्रसंवेगानामासन्नः।	१	२१	११	२२
ते प्रतिप्रसवहेयाः सूक्ष्माः।	२	१०	३०	४

	पा०	सू०	पृ०	पं०
ते व्यक्तसूक्ष्मा गुणात्मानः।	४	१३	७७	१३
ते समाधावुपसर्गा व्युत्थाने सिद्धयः।	३	३७	६३	५
ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्।	२	१४	३०	२३
त्रयमन्तरङ्गं पूर्वेभ्यः।	३	७	५१	१
त्रयमेकत्र संयमः।	३	४	५०	१०

द

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः। ...	१	३१	१६	१७
दुःखानुशयी द्वेषः।	२	८	२८	४
दृग्दर्शनशक्त्योरेकात्मतेवास्मिता।	२	६	२८	१६
दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्। ...	१	१५	८	६
देशबन्धश्चित्तस्य धारणा।	३	१	४८	२०
द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः।	२	२०	३५	७
द्रष्टृदृश्ययोः संयोगो हेयहेतुः।	२	१७	३३	१७
द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्।	४	२३	८३	१

ध

धारणासु च योग्यता मनसः।	२	५३	४७	८
ध्यानहेयास्तद्वृत्तयः।	२	११	३०	८
ध्रुवे तद्गतिज्ञानम्।	३	२८	६०	१८

न

न च तत्सालम्बनं तस्याविषयीभूतत्वात्।	३	२०	५७	२३
न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्। ...	४	१६	७८	१४

	पा०	सू०	पृ०	पं०
न तत्स्वाभासं दृश्यत्वात् ।	४	१८	८०	२३
नाभिचक्रे कायव्यूहज्ञानम् ।	३	२८	६०	२२
निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु तत: क्षेत्रिकवत् । ...	४	३	७२	२०
निर्माणचित्तान्यस्मितामात्रात् ।	४	४	७३	८
निर्विचारवैशारद्येऽध्यात्मप्रसाद: ।	१	४७	२३	१८
प				
परमाणुपरममहत्त्वान्तोऽस्य वशीकार: ।	१	४०	१८	१८
परिणामतापसंस्कारदु:खैर्गुणवृत्तिविरोधाच्च दु:खमेव सर्वं विवेकिन: । ...	२	१५	३२	६
परिणामत्रयसंयमादतीतानागतज्ञानम्	३	१६	५५	८
परिणामैकत्वाद्वस्तुतत्त्वम् ।	४	१४	७८	१
पुरुषार्थशून्यानां गुणानां प्रतिप्रसव: कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ।	४	३४	८८	४
पूर्वेषामपि गुरु: कालेनानवच्छेदात् ।	१	२६	१४	८
प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् । ...	२	१८	३४	२
प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ।	१	३४	१८	१
प्रत्यक्षानुमानागमा: प्रमाणानि ।	१	७	५	३
प्रत्ययस्य परचित्तज्ञानम् ।	३	१९	५७	२१
प्रमाणविपर्ययविकल्पनिद्रास्मृतय: ।	१	६	४	२५
प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ।	२	४७	४५	४
प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ।	४	५	७३	१४
प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम् । ...	३	२५	६०	१

	पा०	सू०	पृ०	पं०
व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्ति-दर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः। ...	१	३०	१६	२
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः।	३	८	५१	१५
श				
शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।	१	८	६	२
शब्दार्थप्रत्ययानामितरेतराध्यासात्सङ्करस्तत्प्र-विभागसंयमात्सर्वभूतरुतज्ञानम्। ...	३	१७	५५	१४
शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी।	३	१४	५३	२१
शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः। ...	३	१२	५२	१
शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः। ...	२	३२	४०	८
शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः।	२	४०	४३	
श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्।	१	२०	११	८
श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्।	१	४८	२४	
श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम्।	३	४१	६४	१
स				
संस्कारसाक्षात्करणात्पूर्वजातिविज्ञानम्।	३	१८	५७	
सति मूले तद्विपाको जात्यायुर्भोगाः।	२	१३	३१	
स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढ़भूमिः	१	१४	७	२
सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति।	३	५५	७१	
सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात्स्वार्थसंयमात्पुरुषज्ञानम्।	३	३५	६२	

	पा०	सू०	पृ०	पं०
त्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठा-				
तृत्वं सर्वज्ञातृत्वं च। ...	३	४८	६७	१४
त्त्वशुद्धिसौमनस्येन्द्रियजयात्मदर्शनयोग्यत्वानि च।	२	४१	४३	१३
त्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्।	२	३६	४२	८
दा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्या-				
परिणामित्वात्। ...	४	१८	८०	११
न्तोषादनुत्तमः सुखलाभः।	२	४२	४३	१८
समाधिभावनार्थः क्लेशतनूकरणार्थश्च।	२	२	२६	२१
समाधिसिद्धिरीश्वरप्रणिधानात्।	२	४५	४४	६
समानजयाज्ज्वलनम्।	३	४०	६४	१२
र्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि-				
परिणामः। ...	३	११	५२	८
सुखानुशयी रागः।	२	७	२८	२३
सूक्ष्मविषयत्वं चालिङ्गपर्य्यवसानम्।	१	४५	२२	१८
सोपक्रमं निरुपक्रमं च कर्म तत्संयमाद-				
परान्तज्ञानमरिष्टेभ्यो वा।	३	२२	५८	२२
स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्ट-				
प्रसङ्गात्। ...	३	५१	६८	६
स्थिरसुखमासनम्।	२	४६	४४	१८
स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः।	३	४४	६५	१२
स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा				
निर्वितर्का। ...	१	४३	२१	१२
स्वप्ननिद्राज्ञानालम्बनं वा।	१	३८	१८	८
स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः।	२	९	२९	७
स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार				
इवेन्द्रियाणां प्रत्याहारः। ...	२	५४	४७	१४

	पा०	सू०	पृ०	पं०
स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः।	२	२३	३६	७
स्वाध्यायादिष्टदेवतासंप्रयोगः।	२	४४	४४	४

ह

हानमेषां क्लेशवदुक्तम्।	४	२८	८५	१५
हृदये चित्तसंवित्।	३	३४	६२	१
हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः। ...	४	११	७६	८
हेयं दुःखमनागतम्।	२	१६	३३	१३

—०—

शुद्धिपत्रम्।

अशुद्धिः	शुद्धिः	पृ०	पं०
तदत्सूक्ष्म	तदत्सूक्ष्म	१०	१
स्वामिमुखं	स्वाभिमुखं	४८	६
८	८	७४	१३
तदुपरागापेक्ष	तदुपरागापेक्षि	८०	१

समणिप्रभं पातञ्जलदर्शनम् ।

वन्दे क्लेशाद्यसंस्पृष्टं पुराणपुरुषं हरिम् ।
प्रकृत्या सीतया जुष्टं योगेशं योगदायिनम् ॥ १ ॥
पतञ्जलिं सूत्रकृतं प्रणम्य
व्यासं मुनिं भाष्यकृतं च भक्त्या ।
भाष्यानुगां योगमणिप्रभाऽऽख्यां
वृत्तिं विधास्यामि यथामतीड्याम् ॥ २ ॥

इह खलु भगवान्पतञ्जलिः प्रेक्षावत्प्रवृत्त्यङ्गं शास्त्रप्रतिपाद्यं दर्शयति :—

अथ योगानुशासनम् ॥ १ ॥

अत्र "अथ" शब्द आरम्भार्थः योगशास्त्रमारभ्यत इत्यर्थः। यद्यपि हिरण्यगर्भेण शास्त्रं कृतं तथाऽपि तदविस्तृतमिति मत्वा तदनुसृतं शास्त्रमारभ्यत इति द्योतयति "अनुशासनम्" इति। अत्र सूत्रे "योगः" शास्त्रप्रतिपाद्य उक्तः अर्थात्तज्जिज्ञासुरधिकारी फलं तु योगस्य कैवल्यं यथायोगं तेषां सम्बन्ध इत्यनुबन्धचतुष्टयं द्रष्टव्यम्। तत्र "योगः" द्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति। स च चित्तस्य धर्मः, वृत्तीनां चित्तधर्मत्वेन तन्निरोधरूपयोगस्यापि तद्धर्मत्वात्। तस्य चित्तस्य पञ्च भूमयः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति। रजसाऽत्यन्तं चलं क्षिप्तं दैत्यानां ; तमसा निद्रादिमन्मूढं रक्षसां ; क्षिप्तादिशिष्टं विक्षिप्तं देवादीनाम् ; अत्यन्तचलचित्तस्य कादाचित्कं स्थिरत्वं विशेषः। तत्र क्षिप्तमूढयोर्योगलक्षणमपि नास्ति। विक्षिप्ते तु चित्ते

कादाचित्को योगः प्रचुरविक्षेपवह्निदग्धोऽप्रतिष्ठितो निष्फलो न योगपक्षे वर्त्तते। एकाग्रे तु सत्त्वप्रधाने एकविषयस्थिते चित्ते रजस्तमोवृत्तिनिरोधः सात्त्विकवृत्तिविशेषः संप्रज्ञातयोगो भवति। तेन शब्दानुमानाभ्यां परोक्षत्वेन ज्ञातार्थः साक्षात्क्रियते साक्षात्कारादविद्यादिक्लेशक्षयः ततः पुण्यपापकर्मणां दाहः ततोऽसंप्रज्ञातो योगः सात्त्विकवृत्तेरपि निरोधः संस्कारमात्रशेषे निरुद्धे चित्ते भवति। तदाह भाष्यकारः—"यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयति, क्षिणोति च क्लेशान्, कर्मबन्धनानि श्लथयति, निरोधमभिमुखं करोति, स संप्रज्ञातो योग इत्याख्यायत इति ॥ १ ॥

अधुना द्विविधस्य योगस्य साधारणं लक्षणमाह :—

योगश्चित्तवृत्तिनिरोधः ॥ २ ॥

चित्तस्य रजस्तमोवृत्तीनां निरोधो "योगः" इत्यर्थः। अतः संप्रज्ञाते सात्त्विकवृत्तिसत्त्वेऽपि नाव्याप्तिः। नन्वेकस्य चित्तस्य क्षिप्ताद्यनेकभूमयः कुत इति चेत्, चित्तस्य त्रिगुणात्मकत्वादिति ब्रूमः। चित्तं हि ज्ञानसुखादिशीलत्वात् प्रवृत्तिगुणादिमत्त्वादालस्यदैन्यादिमत्त्वाच्च सत्त्वरजस्तमोगुणकं भवति। तत्र सत्त्वाल्किञ्चिदूने रजस्तमसौ मिथः समे यदा भवतः, तदा सत्त्वात् तदृध्यानाभिमुखं भूत्वा तमसा तत्प्रधाने सति रजसैश्वर्यं कामयमानं विषयप्रियं भवति विक्षिप्तम्। यदा तु तमः प्रधानं चित्तं मूढं तदाऽश्रेयोऽधर्माज्ज्ञानावैराग्यानैश्वर्यमुपगच्छति अज्ञानमत्र भ्रमो निद्रा च। रजःप्रधानं तु क्षिप्तम्। इमे क्षिप्तमूढे सर्वसाधारणे भवतः। विक्षिप्तं तु प्रथमयोगिनः सन्ति हि चत्वारो योगिनः, प्रथमकल्पिकः, मधुभूमिकः, प्रज्ञाज्योतिः, अतिक्रान्तभावनीयश्चेति, तेषां लक्षणं तु वक्ष्यते

यदि पुनः सत्त्वप्रधानं वितमस्कं सरजस्कं भवति तदैकाग्र्यं संप्रज्ञातयोगसिद्धयोर्मध्यमयोगिनोश्चित्तं धर्मज्ञानवैराग्यैश्वर्य्यवद्भवति। यदा तु विधूतरजस्तमोमलं शुद्धसत्त्वं चित्तं तदानीं विवेकख्यातिं कृत्वा पुरुषमात्रध्यानं धर्ममेघाख्यं करोति तत्परं प्रसंख्यानमित्याचक्षते ध्यायिनः। "चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च" इति निश्चित्य सत्त्वगुणविकृतौ विवेकख्यातावपि विरक्तं सच्चित्तं तां निरुध्य संस्कारमात्रशेषं भवति चतुर्थस्य योगिनः। सोऽयमसंप्रज्ञातसमाधिः। अत्र हि न हि किञ्चित्प्रज्ञायत इत्यलम्। चितिशक्तिरित्याद्यनन्ता चेत्यन्तं भाष्यम्। तत्राप्रतिसंक्रमेत्यस्य विले सर्पवदशुद्धादौ प्रविश्य न सञ्चरतीत्यर्थः। बुद्ध्या दर्शिता विषया यस्याः सा दर्शितविषया सुखदुःखमोहशून्या शुद्धेत्यर्थः॥ २॥

ननु बुद्धिवृत्तिस्वभावस्य पुरुषस्य वृत्तिनिरोधे कथं स्थितिरित्यत आह :—

तदा द्रष्टुः स्वरूपेऽवस्थानम्॥ ३॥

यदा चित्तस्य शान्तघोरमूढ़ानां सर्वासां वृत्तीनां निरोधस्तदा द्रष्टुश्चिदात्मनः स्वाभाविके रूपे स्थितिः, कुसुमापाये यथा स्फटिकस्य तथेत्यर्थः पुरुषस्य चैतन्यमात्रं स्वभावो न वृत्तय इति भावः॥ ३॥

ननु तर्हि व्युत्थाने पुरुषस्य स्वभावात् प्रच्युतिः स्यादित्याशङ्क्याह :—

वृत्तिसारूप्यमितरत्र॥ ४॥

इतरत्र निरोधाद् व्युत्थाने सति याश्चित्तस्य वृत्तयः शान्ताऽशान्तास्तत्सारूप्यं वृत्तिमद्बुद्धिविवेकात् पुरुषस्य शान्तो दुःखी

मूढोऽस्मीति वृत्तितादात्म्यभ्रम इत्यर्थः अतो न स्वभावात् प्रच्युतिः। न हि लौहित्यभ्रमकाले स्फटिकस्य श्वेतस्वभावात् च्युतिरस्तीति भावः। निरोधे मुक्तिर्व्युत्थाने बन्ध इति सूत्रद्वयतात्पर्यम् ॥ ४ ॥

इदानीं निरोद्धव्यानां वृत्तीनामियत्तामाह :—

वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाः ॥ ५ ॥

राजवार्त्तिके "चित्तवृत्तिनिरोधान् व्याख्यातुकामेन सूत्रकारेण सूत्रद्वयेन यस्य निरोधव्युत्थानयोर्मुक्तिबन्धौ तच्चित्तमिति व्याख्याय, "वृत्तयः" इत्यादिना वृत्तीर्व्याख्याय, अभ्यासवैराग्याभ्यामित्यादिना पादशेषेण निरोधो व्याख्यातः" इति विशेष उक्तः। अवयवार्थस्तयप्। वृत्तिशब्दो वृत्तिसामान्यपरः। चैत्रमैत्रादिचित्तभेदेन वृत्तिसामान्यानां बहुत्वात् "वृत्तयः" इति बहुवचनम्। अग्रिमसूत्रोक्ताः प्रमाणादयः पञ्च विशेषा वृत्तिसामान्यस्यावयवा इत्यर्थः। पञ्च अवयवा यासां ताः पञ्चतय्यः तासां हानोपादानसिद्धये भेदमाह "क्लिष्टा अक्लिष्टाः" इति। रागद्वेषादिक्लेशानां हेतवः "क्लिष्टाः" बन्धफलाः। सर्वो हि जन्तुः प्रमाणादिवृत्तिभिर्ज्ञातेष्वर्थेषु रागादिना कर्म कृत्वा सुखादिना बध्यते। "अक्लिष्टाः" क्लेशनाग्न्यो मुक्तिफलाः। सत्त्वपुरुषान्यतागोचराः ताः खल्वभ्यासवैराग्याभ्यां क्लिष्टवृत्तिप्रवाहमध्ये जायमानाः स्वजन्याक्लिष्टसंस्कारैः पुनःपुनरभ्यासेन प्रवृद्धैः क्लिष्टसंस्कारनिरोधेन क्लिष्टवृत्तिप्रवाहं निरुध्य परवैराग्येण स्वयं निरुध्यन्ते। ततः संस्कारशेषस्य चित्तस्य प्रलयो मुक्तिर्भवतीति भावः ॥ ५ ॥

पञ्चवृत्तीरुद्दिशति :—

प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः ॥ ६ ॥

इतोऽन्या वृत्तिर्नास्तीत्युद्देशसूत्रस्य फलम् ॥ ६ ॥

तत्र प्रमाणवृत्तिं विभजते :—

प्रत्यक्षानुमानागमाः प्रमाणानि ॥ ७ ॥

त्रीण्येव प्रमाणानीति भावः । अत्र प्रमाकरणत्वं सामान्यलक्षणम् । प्रमा चाज्ञातार्थावगाही पौरुषेयो बोधो वृत्तौ प्रतिबिम्बः । तत्करणं वृत्तिः । ततेन्द्रियसम्बन्धद्वारा चित्तस्य घटादिसम्बन्धे सति सामान्यविशेषात्मकेऽर्थे व्यक्तिरूपविशेषनिर्द्धारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम् । तत्रार्थाकारायां वृत्तौ चिदात्मनो यः प्रतिबिम्बः सोऽपि वृत्तिद्वारा अर्थाकारः सन् फलं भवति । एवं सामान्यतो ज्ञाते परोक्षार्थे समाधिना विद्यमानविशेषवृत्तिः प्रत्यक्षप्रमाणमिति ज्ञेयम् । अनुमानागमयोर्व्याप्तिग्रहापेक्षत्वाद्व्यक्तित्वादिसामान्ये तद्ग्रहात् सामान्यविषयत्वमेव । तत्र व्याप्तिग्रहे सति पक्षवृत्तिलिङ्गज्ञानात् साध्यताऽवच्छेदकसामान्यनिर्द्धारणवृत्तिरनुमानम् । आप्तेन दृष्टोऽनुमितोवाऽर्थो येन शब्देनोपदिश्यते तस्माच्छब्दाच्छ्रोतुस्तदर्थविषया वृत्तिरागमः । वेदस्याप्तेश्वरप्रणीतत्वं वक्ष्यते ॥ ७ ॥

विपर्ययं लक्षयति :—

विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥ ८ ॥

तत्तद्रूपे स्वविषये प्रतिष्ठाशून्यं बाधविरोधीति यावत् । विकल्पोऽपि बाधविरोधी तद्रूपाप्रतिष्ठ इत्यतिव्याप्तिनिरासाय "मिथ्याज्ञान" पदं तेन स्वविषये स्वजन्यव्यवहारलोपिसर्वसम्मतबाधवत्त्वमुच्यते । न च विकल्पे तादृशबाधोऽस्ति केषाञ्चित् पण्डितानां तत्र बाधबुद्धावपि यथापूर्वं व्यवहारालोपात् । मैवमयस्तु लक्षण एवेति नातिव्याप्तिरिति भावः । अस्यैव विपर्ययस्य भेदाः पञ्च क्लेशा इति वक्ष्यते ॥ ८ ॥

विकल्पं लक्षयति :—

शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥ ९ ॥

नरशृङ्गादिश्रवणानन्तरमवश्यं भवत्येव निर्विषया वृत्तिर्या सा विकल्प इत्यर्थः । अयं विकल्पो वस्तुशून्यत्वान्न प्रमाणं, बाधेऽप्यवश्यभावित्वाद् व्यवहारहेतुत्वाच्च न विपर्ययः । यथा चैतन्यमेव पुरुष इत्यभेदनिश्चयेऽपि पुरुषस्य चैतन्यभेदविकल्पः, भावातिरिक्ताभावो नास्तीति निश्चयेऽपि सर्वधर्माभाववान् पुरुष इति विशेषणविशेष्यभावविकल्पः । एवं राहोः शिर इत्यादि-विकल्पा उदाहार्याः ॥ ८ ॥

निद्रां लक्षयति :—

अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥ १० ॥

कार्यं प्रत्ययते गच्छतीति "प्रत्ययः" हेतुः । जाग्रत्स्वप्नवृत्तीना-मभावे हेतुस्तमः "आलम्बनं" विषयो यस्याः सा "वृत्तिः" निद्रा । वृत्तिपदस्यानुवर्तमानस्योच्चारणं ज्ञानाभावो निद्रेति मतनिरा-सार्थम् । तथा हि उत्थितस्य सुखमहमस्वाप्समिति स्मरणं बुद्धिसत्त्वसचिवतमोविषयं तदनुभवं कल्पयति । दुःखमहमस्वा-प्समिति स्मरणं रजस्तमोविषयं तदनुभवं कल्पयति । गाढ़मूढ़-महमस्वाप्समिति केवलतमोविषयं स्मरणं तदनुभवं कल्पयति । स चानुभवो बुद्धिधर्मो निद्रा । सा चैकाग्रवृत्तिकल्पाऽपि तामसत्वाद्योगार्थिना निरोद्धव्येति भावः ॥ १० ॥

स्मृतिं लक्षयति :—

अनुभूतविषयासंप्रमोषः स्मृतिः ॥ ११ ॥

प्रमाऽप्यनुभवो हि स्मृतेः पिता तस्य विषयः स्मृतेरात्मीयः । लोके पितुः स्वमिव पुत्रस्य । स्मृतेर्मूलानुभवाविषयस्तु परस्वं

ग्रहः संप्रमोषः स्तेयः। तथा चानुभूते विषये योऽयं "असं-
ोषः" अधिकाग्रहः अनुभूतमात्रग्रह इति यावत् सा स्मृति-
र्थः। वृत्तिस्थः पौरुषबोधोऽनुभवः स्वप्रकाश इति तज्ज्न्य-
कारादनुभवविषयाऽपि स्मृतिर्भवति। ननु स्वकाये गज-
ाद्यमननुभूतमपि स्वप्ने स्मर्यते इति चेन्न तस्य विपर्य्ययत्वा-
ति भावः॥ ११॥

आसां वृत्तीनां निरोधोपायमाह :—

अभ्यासवैराग्याभ्यां तन्निरोधः॥ १२॥

सर्वस्य जन्तोः स्वभावतश्चित्तवृत्तिर्नदी विषयभूमिगा
ारसागराभिमुखी प्रवहति। तत्र विषये वैराग्येण तत्प्रवाहं
रुद्धा सत्त्वपुरुषविवेकाभ्यासेन तस्या नद्याः प्रत्यक्प्रवाहः
यते। अनभ्यासे हि लयविक्षेपस्वभावस्य चित्तस्य वैराग्याद्-
क्षेपभङ्गे निद्रा स्यात्, तस्मादभ्यासवैराग्ये लयविक्षेपनिवृत्ति-
प्रयोजनभेदेन निरोधे कार्ये समुच्चीयेते॥ १२॥

अभ्यासस्वरूपमाह :—

तत्र स्थितौ यत्नोऽभ्यासः॥ १३॥

"तत्र" तयोर्मध्ये रजस्तमोवृत्तिशून्यस्य चित्तस्यैकाग्रता
स्थितिः" तस्यां कार्य्यायां यानि साधनानि यमनियमादीनि
विषयः "यत्नः" अनुष्ठानम् "अभ्यासः" इत्यर्थः॥ १३॥

नन्वनादिप्रबलराजसतामसवृत्तिसंस्कारैर्विरोधिभिः कुण्ठि-
ऽभ्यासो न स्थित्यै कल्पत इत्यत आह :—

तु दीर्घकालनैरन्तर्य्यसत्कारासेवितो दृढभूमिः १४

"तु"शब्दः शङ्कानिरासार्थः। "सः" अभ्यासो दीर्घकालं

तपोब्रह्मचर्य्यविद्याश्रद्धारूपसत्कारेण नैरन्तर्य्येण चासेवितोदृढ़ संस्कारः स व्युत्थानसंस्कारैर्नाभिभूयते किन्तु स्थितिसमर्थो भवतीत्यर्थः । "अथोत्तरेण तपसा ब्रह्मचर्य्येण श्रद्धया विद्ययाऽऽत्मान मन्विष्येति" श्रुतिः सत्कारं दर्शयति ॥ १४ ॥

वैराग्यस्वरूपमाह :—

दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञं वैराग्यम् ॥ १५ ॥

यतमानव्यतिरेकैकेन्द्रियवशीकारसंज्ञाश्चतस्रः । तत्र रागादीनां चित्तस्थानां कषायाणां विषयेष्विन्द्रियप्रवर्त्तकानां पाकाय प्रयत्नो यतमानसंज्ञा वैराग्यं, ततः पक्वानां केषाञ्चित् कषायाणां पच्यमाणेभ्यो विभागावधारणं व्यतिरेकसंज्ञा वैराग्यं ततः पक्वानां सर्वेषामिन्द्रियप्रवर्त्तनाशक्तानां मनस्यौत्सुक्य रूपेणावस्थानमेकेन्द्रियसंज्ञा वैराग्यं, स्त्रियोऽन्नपानमित्यादि दृष्टेषु, गुरूच्चारणमनुश्रवः श्रवणं यस्य सोऽनुश्रवो वेदः तदुक्तेष्वानुश्रविकेषु, स्वर्गादिदिव्यादिव्यविषयेषु विनाशपरितापसातिशयत्वासूयादिदोषाणामभ्यासेन साक्षात्कारात् "वितृष्णस्य" उपेक्षा बुद्धिः "वशीकारसंज्ञा" "वैराग्यम्" इत्यर्थः ॥ १५ ॥

अपरं वैराग्यमुक्त्वा परं वैराग्यमाह :—

तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ॥ १६ ॥

पूर्ववैराग्यमुत्तरवैराग्ये हेतुः । तथा हि वक्ष्यमाणयोगाङ्गानुष्ठानादनतिशुद्धचित्तस्य विषयेषु दोषदर्शनाद् वशीकारसंज्ञकं वैराग्ये सति गुर्वागमावगतस्य पुरुषस्य या ख्यातिस्तदभ्यासाद्धर्ममेघाख्यध्यानरूपान्नितान्तविध्वस्ततमोरजोमलं चित्तं सत्त्वमात्रशेषमतिप्रसन्नं भवति । सोऽयमतिशुद्धचित्तधर्मः प्रसादो

र्ममेघस्योत्तरावधिः तस्यैव फलीभूतः, परं गुणेभ्योवैतृष्ण्यं राग्यमुच्यते यं मुक्तिहेतुसाक्षात्कारं वदन्ति मोक्षविदः । यस्यो-ये प्रक्षीणसर्वक्लेशो विधूताशेषकर्माशयः कृतविवेकख्यातावु-पेक्षकः कृतं कृत्यं प्राप्तं प्रापणीयमिति मन्यते योगी । यदन-रमेव चित्तमसंप्रज्ञातसंस्कारमात्रशेषं भवति तत्परं वैराग्यम् । परं तु वैराग्यं वितमस्कस्य रजोलेशमलस्य चित्तस्य धर्मः त: प्रकृतौ लीना ऐश्वर्य्यमनुभवन्ति । यथोक्तं "वैराग्यात्प्रकृति-य:" इति ॥ १६ ॥

एवमभ्यासवैराग्ये निरूप्य तत्साध्यं निरूपयन्नादौ संप्रज्ञातं तुर्विधं दर्शयति :—

तर्कविचारानन्दास्मितारूपानुगमात्संप्रज्ञातः १७

यथा लोके प्राथमिकधानुष्कः स्थूलमेव लक्ष्यं विध्यति पश्चात्-क्ष्मं तथा प्राथमिको योगी स्थूलमेव शालग्रामादिकं ध्यानेन ाक्षात्करोति स स्थूलसाक्षात्कारो "वितर्कः" । तस्य स्थूलस्य ारणं पञ्चतन्मात्रादिकं सूक्ष्मं तस्य ध्यानेन साक्षात्कारो विचारः" । इन्द्रियाणि स्थूलानि प्रकाशकत्वात्सत्त्वरूपाणि तेषां ानेन साक्षात्कारः "आनन्दः" । तेषां कारणं बुद्धिः पुरुषेण ोवैकीभूता सती अस्मिता तस्या ध्यानेन साक्षात्कारः "अप्य-यत" इच्यते । तत्र स्थूलं च ग्राह्यमिन्द्रियाणि ग्रहणानि स्मिताऽऽख्यो ग्रहीता तेषु ग्रहीत्रग्रहणग्राह्येषु ध्यानपरिपाकः प्रज्ञातः"योगः । स च वितर्कविचारानन्दास्मितास्वरूपैश्चतुर्भिः नुगमात्" चतुर्विधः सवितर्कः, सविचारः, सानन्दः, सास्मित ति । अत्र यथा घटज्ञानं मृद्विषयं तादात्म्यात् तथा स्थूलयोगः लसूक्ष्मेन्द्रियास्मिताविषयकः, सूक्ष्मयोगस्त्वयविषयकः, अन्यौ कविषयाविति विशेषः । आथ[illegible]ज्ञापितः । तत्र [illegible]ज्ञानं घटा-

विषयं यथा तद्वत्स च्चमादियोगाः स्थूलाद्यविषया इति मन्त व्यम् । भोजवृत्तौ तु इन्द्रियेषु सवितर्कमुक्ता, तन्मात्रेषु सविचार मुक्ता, अहङ्कारे सानन्दो, महतत्त्वे सास्मित इत्युक्तम् । तत्राह मितिविषयग्राहकान्तःकरणमहङ्कारः । अन्तर्मुखं सत्तामात्र महतत्त्वे लीनं सत्तामात्रावभासकमस्मितेति तयोर्भेदः । ग्रहीत पुरुषः ॥ १७ ॥

अधुना सोपायमसंप्रज्ञातमाह :—

विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥ १८ ।

वृत्तीनामभावो "विरामः" तस्य "प्रत्ययः" कारणं परवैरा तद् "अभ्यासः" "पूर्वः" उपायो यस्य स तथा । अनेन पदेनोपा उक्तः "अन्यः" असंप्रज्ञातः "संस्कारशेषः" । परं हि वैराग्य संप्रज्ञातसंस्कारानप्यभिभूय स्वसंस्कारं शेषयति । स निर्बी समाधिः । निरालम्बनत्वात् कर्मबीजाभावाच्चेत्यर्थः ॥ १८ ॥

अयमसंप्रज्ञातो द्विविधः भवप्रत्यय, उपायप्रत्ययश्च, तत्राद मुमुक्षुभिर्हेयस्तमाह :—

भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥ १९ ॥

भूतेन्द्रियाणामन्यतमस्मिन् विकारेऽनात्मन्यात्मत्वभावनया दे पातानन्तरं भूतेन्द्रियेषु लीनाः षाट्कौशिकदेहशून्या "विदेहाः" अव्यक्तमहदहङ्कारपञ्चतन्मात्रेषु प्रकृतिष्वात्मत्वभावनया लीन "प्रकृतिलयाः" । तेषां चित्तं संस्कारमात्रशेषमित्यसंप्रज्ञातः स तु "भवप्रत्ययः" । भवन्ति जायन्तेऽस्यां जन्तव इत्यवि "भवः" अनात्मन्यात्मत्वबुद्धिः स प्रत्ययो हेतुरस्य स तथा अविद्या मूलोऽयं योगोऽन्तवत्फलः । यदाह वायुः —

"शतमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः ।
भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥
बौद्धा दशसहस्राणि तिष्ठन्ति विगतज्वराः ।
पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः ॥
पुरुषं निर्गुणं प्राप्य कालसंख्या न विद्यते ॥"

इति येषां विवेकख्यातिर्नास्ति तेषां चित्तं लीनमप्युत्थाय सारे पतति सुप्तचित्तवदिति भावः ॥ १८ ॥

अधुना द्वितीयमुपादेयमाह :—

श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ॥२०॥

पुरुषगोचरा सात्त्विकी "श्रद्धा" तया "वीर्यं" प्रयत्नो जायते न यमनियमादिपरम्परया "स्मृतिः" ध्यानं तेन "समाधिः" तेन प्रज्ञा" पुरुषगोचरख्यात्यभ्यासः संप्रज्ञातस्ततः परवैराग्यादसंज्ञातः "इतरेषां" मुमुक्षूणां योगिनां भवति ॥ २० ॥

श्रद्धाऽऽदयः प्रज्ञान्ता उपायास्तत्पूर्वकोऽयमुपायप्रत्ययः तेोपायाः प्राणिनां प्राक्संस्कारबलान्मृदुमध्याधिमात्रभेदास्त्रिविास्तया च योगिनस्त्रयो भवन्ति मृदूपायो, मध्योपायोऽधिमाोपाय, इति । तत्र मृदूपायस्त्रिविधः मृदुसंवेगो, मध्यसंवेगः, ाव्रसंवेग इति । एवमितरावपि त्रिविधौ भवतः । एवं च नवोगिनो भवन्ति । तेषां चिरं चिरतरं क्षिप्रं क्षिप्रतरं सिद्धयो वन्ति उपायतारतम्यात् । तत्र केषाञ्चित् क्षिप्रतरं सिद्धिरित आह :—

तीव्रसंवेगानामासन्नः ॥ २१ ॥

संवेगो वैराग्यं येषां तीव्रम्, उपायाश्चाधिमात्रास्तेषां योगिामासन्नः समाधिरसंप्रज्ञातस्ततो मोक्ष इत्यर्थः ॥ २१ ॥

मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥ २२ ॥

तीव्रस्य संवेगस्यापि "मृदुमध्याधिमात्रत्वात्ततः" मृदुतीव्र-संवेगस्य योगिन आसन्नात् समाधेर्मध्यतीव्रसंवेगस्यासन्नतरा-दधिमात्रतीव्रसंवेगस्यासन्नतमः, समाधिलाभ इति "विशेषः" इत्यर्थः ॥ २२ ॥

ईश्वरप्रणिधानाद्वा ॥ २३ ॥

"ईश्वरे" कायिकाद्वाचिकान्मानसात् "प्रणिधानाद्" भक्तिविशे-षादासन्नतमः समाधिलाभः । "वाशब्दः" पूर्वोक्तोपायेनास्य भक्त्युपायस्य विकल्पार्थः । भक्तेरन्यानपेक्षत्वादीश्वरो हि भक्त्या ऽभिमुखः सन्निदमिष्टमस्यास्त्वित्यनुगृह्णातीति भावः ॥ २३ ॥

ईश्वरस्वरूपं निरूपयति :—

क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ॥ २४ ॥

"क्लेशाः" अविद्यादयः पञ्च । "कर्म" धर्माधर्मौ । तयो फलं "विपाकः" । फलानुकूलाः संस्कारा "आशयाः" । मनस्या शेरत इति व्युत्पत्तेः । यथा नरस्य करिजन्मनि काष्ठभोग संस्कारा उद्बुवन्ति अन्यथा जीवनासम्भवात् तैः क्लेशादिभि श्चित्तस्थैः "परामृष्टः" सांसारिकः पुरुषश्चित्ताविवेकेन भोक्त त्वात् तैः कालत्रयेऽप्यसम्बद्धः "पुरुषः" "ईश्वरः" "विशेष" पदे कालत्रयासम्बन्धवाचिना मुक्तजीवेभ्यो व्यावृत्तिः कृता । तेष पूर्वकाले बन्धत्वयसम्बन्धात् प्रकृतौ लीनानां प्राकृतो बन्धः, भूत न्द्रियेषु विकारेषु लीनानां विदेहानां वैकारिकः, अन्येष दैवनरादीनां दक्षिणाबन्धः, चित्ताधीनकर्मफलत्वादिति भेदः ननु ज्ञानक्रियाशक्तिमत्त्वं परमैश्वर्यं पुरुषस्यापरिणामिनः कथ

पात। उच्यते। अस्ति ईश्वरस्यानादिसिद्धं शुद्धसत्त्वात्मकं चित्तं धानजं निरतिशयज्ञानक्रियाशक्तिमत् स हि भगवान् संसारावाज्जन्तूनामुद्धरणेच्छया तच्चित्तमुपादत्ते तद्विना ज्ञानधर्मोपशभक्तानुग्रहायोगात्। न च कथं चित्तोपादानात् प्रागिच्छोदेतीति वाच्यम्। वीजाङ्कुरवदनादित्वात् सर्गप्रलयप्रवाहस्य दा सर्वकार्य्यस्य प्रलयस्तदा भविष्यत्कल्पे लोकानुग्रहार्थमिदं चित्तमुपादेयमिति भगवता सङ्कल्प्यते तत्सङ्कल्पवासितं प्रधानं तीनं सत्सर्गादौ चित्तमुद्भवति तेन चेश्वरोऽनुगृह्णातीत्यनवद्यम्। नु तादृशचित्तसत्त्वे किं मानमिति चेत् "स्वाभाविकी ज्ञानबलक्रिया च एष सर्वेश्वरः" इत्यादिवेदवाक्यमिति क्रमः। देदो निरतिशयज्ञानशक्तिविशिष्टेश्वरप्रणीतोऽतः प्रमाणमिति संक्षेपः ॥ २४ ॥

एवं वेदप्रमाण्यात् सिद्धः सर्वज्ञ ईश्वरः तस्य सर्वज्ञत्वेऽनुमानमप्याह :—

तत्र निरतिशयं सर्वज्ञबीजम् ॥ २५ ॥

अस्मदादीनां ज्ञानं, निरतिशयेन ज्ञानेनाविनाभूतं भवितुमर्हति, सातिशयत्वात्, यत्सातिशयं तत्समानजातीयेन निरतिशयेन युक्तं, यथा कुम्भपरिमाणं विभुपरिमाणेन, तद्विद्धं निरतिशयं" ज्ञानं "सर्वज्ञस्य" "बीजं" ज्ञापकं यत्र निरतिशयं ज्ञानं "तत्र" सर्वज्ञत्वं ज्ञायत इत्यर्थः। तस्य सामान्येन सिद्धस्य सर्वज्ञस्य श्रुत्यादिसिद्धाः शिवविष्णुनारायणमहेश्वरादिसंज्ञाः। तथा च वायुपुराणे :—

"सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षड़ाहुरङ्गानि महेश्वरस्य ॥

ज्ञानवैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च ॥
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥" इति ।

तथा महाभारते :—

"अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥"

इत्यादि ॥ २५ ॥

तस्य भगवतो ब्रह्मादिभ्यो विशेषमाह :—

पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥ २६ ॥

"पूर्वेषां" सर्गादावुत्पन्नानां कालपरिच्छिन्नानां "गुरुः" ईश्वरः । कुतः "कालेनानवच्छेदात्" अनाद्यन्तत्वादित्यर्थः । तथा च श्रुतिः । "यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै" इत्याद्या ॥ २६ ॥

एवमीश्वरं निरूप्य तत् प्रणिधानं वक्तुं तस्य रहस्यसंज्ञामाह :—

तस्य वाचकः प्रणवः ॥ २७ ॥

सुगमं सूत्रम् । ननु शब्दस्य वाचकत्वम् अभिधाऽऽख्या शक्तिः शब्दार्थयोः सम्बन्ध इत्युच्यते । सा किं सङ्केतेन क्रियते, व्यज्यते, वा ? नाद्यः । प्रतिकल्पं स्वतन्त्रेश्वरस्य सङ्केतभेदेन शब्दार्थव्यवस्थाप्रसङ्गात् । न द्वितीयः । सूर्यादिशब्दानां पुत्रेषु पित्रा सङ्केतवैफल्यात् । न हि तत्र सङ्केतव्यङ्ग्या शक्तिरस्ति । न चासति व्यङ्ग्ये व्यञ्जकमर्थवत् तस्मादिदं सङ्केतसूत्रं व्यर्थमिति चेद् । उच्यते । स्थितैव शक्तिः सङ्केतेन व्यज्यते यथा स्थित एव पितृपुत्रभावो ममायं पुत्र इति वाक्येन व्यज्यते तद्वन्नवादिशब्देषु प्रलये प्रधानसाम्यं गतेषु सर्गादौ पुनः शक्त्या सङ्घोद्भूतेषु स्थितामेव

पत्त च्छब्दस्य तत्तदर्थे शक्तिमीश्वरः सङ्केतेन ज्ञापयति । जीवानां नुग्रसंस्कारत्वात् । अधुनातनपित्रादिसङ्केतस्तु शक्तेरुत्पादकः । केचित्तु सर्वशब्दानां सर्वार्थेषु शक्तिरस्तीति पित्रादिसङ्केतोऽपि यज्ञकः गवादिशब्दानां तु वेदार्थव्यवस्थाऽर्थमीश्वरसङ्केतेनार्थ-विशेषे शक्तिर्नियम्यत इत्याहुः । सर्वथाऽपि वैदिकशब्दार्थ-सम्बन्धो व्यवस्थितव्यवहारतया नित्य इति सिद्धम् ॥ २७ ॥

एवं वाचकमुक्त्वा प्रणिधानमाह :—

तज्जपस्तदर्थभावनम् ॥ २८ ॥

अस्य भाष्यमेव लिख्यते । "प्रणवस्य जपः प्रणवाभिधेयस्य वेश्वरस्य भावनं तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतः चित्तमेकाग्रं सम्पद्यते । तथा चोक्तम् :—

"स्वाध्यायाद्योगमासीत योगात् स्वाध्यायमामनेत् ।
स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते ॥" २८ ॥

तस्येश्वरप्रणिधानस्यासन्नतमः समाधिलाभः फलमिति पूर्व-क्तम् । अधुना फलान्तरमपि तदनुगुणमाह :—

ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥२९॥

प्रतीपं विपरीतमञ्चति जानातीति "प्रत्यक्" आत्मा इत्यर्थः । तनेनेश्वराङ्गेद उक्तः बुद्धेरप्यन्तरं वा । प्रत्यक् चासौ "चेतनश्च" स्य "अधिगमः" साक्षात्कारः "ततः" प्रणिधानाङ्गवति । अपि "अन्तरायाणामभावश्च" भवति । ननु स्वभिन्नेश्वरप्रणिधानात् प्रसाक्षात्कारः कथं स्यात् अभ्यासतज्जन्यज्ञानयोः षड्जादावेक-विषयत्वदर्शनादिति चेद् । उच्यते । यथैवेश्वरोऽसङ्गश्चिद्रूपः टस्थः क्लेशादिशून्यस्तथैव जीव इति सादृश्यादीश्वरध्यानं तदनु-हद्वारा जीवस्वरूपसाक्षात्कारहेतुरित्यनवद्यम् ॥ २९ ॥

अन्तरायानाह :—

व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्ति दर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षे पास्तेऽन्तरायाः ॥ ३० ॥

ये चित्तं योगाद्विक्षिपन्ति भ्रंशयन्ति "ते" "चित्तविक्षेपाः योगस्य "अन्तरायाः"विघ्ना नव । तत्र "व्याधिः"वातपित्तश्लेष्मण मन्नरसस्येन्द्रियाणां च वैषम्यं, "स्त्यानं" चित्तस्य लुब्धत्वेऽ कर्मानर्हता, "संशयः" प्रसिद्धः, योगाङ्गाननुष्ठानं "प्रमादः "आलस्यं" चित्तस्य गुरुत्वादप्रवृत्तिः, "अविरतिः" विषयतृष्ण "भ्रान्तिदर्शनं" एककोटिको विपर्ययः, "अलब्धभूमिकत्वं समाधिभूम्यलाभः, मधुमत्यादयः समाधिभूमयो वक्ष्यन्ते "अनवस्थितत्वं" नाम लब्धायां भूमौ चित्तस्यास्थिरत्वं, पूर्वभूमं हि स्थितं चित्तम् उत्तरभूमिं जयेत्, तस्मादस्थिरत्वं दो इत्यर्थः ॥ ३० ॥

न केवलमेते विक्षेपा योगनाशकाः, किन्तु दुःखादीनां कुर्वन्तीत्याह :—

दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षे पसहभुवः ॥ ३१ ॥

"दुःखं" व्याधिजं शारीरं, कामादिजं मानसं, तद्वयमाध्य त्मिकम् । व्याघ्रादिजमाधिभौतिकम् । ग्रहपीड़ादिजम् आधि दैविकम् । दौर्मनस्यमिच्छाविघातात् क्षोभो मनसि । अङ्गमे जयतोभावोऽङ्गमेजयत्वमङ्गानां कम्पनमित्यर्थः । अनिच्छ प्राणो यं वाह्यवायुमन्तः प्रवेशयति स श्वासः समाध्यङ्गरेचव

वरोधीत्यर्थः। एवमनिच्छतः कौष्ठ्यस्य वायोर्वहिर्गमनं प्रश्वासः रकविरोधी। एते विक्षेपैः सह भवन्ति विक्षिप्तचित्तस्य वन्तीत्यर्थः॥ ३१॥

ईश्वरप्रणिधानादेतेषामभाव इत्युक्तमुपसंहरति :—

तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः॥ ३२॥

विक्षेपाणां नाशार्थमेकतत्त्वस्येश्वरस्य "अभ्यासः" ध्यानं कार्य्यमित्यर्थः। अत्र "भाष्यकारैः" स्थायि चित्तं स्यात्तस्यैकाग्रताभ्यादनीयेति क्षणिकमतमाशङ्क्य सोऽहमिति प्रत्यभिज्ञानादिना वेत्तमेकमनेकार्थावगाहि स्थायि विद्यत इति साधितम्॥३२॥

तस्य चित्तस्यासूयाऽऽदिमलवतो योगायोगात्तन्मलनिरासोायानाह :—

मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्॥ ३३॥

सुखिषु प्राणिषु "मैत्रीं" मित्रतां, दुःखितेषु "करुणां" दयां, ण्यवर्त्तिषु "मुदिताम्" हर्षम्, अपुण्यशब्दितपापवृत्तिषु उपेक्षां" मध्यस्थवृत्तिं भावयेत्। तया भावनया चित्तस्य प्रसादनं" भवति। सुखादिषु यथाक्रममुक्तया भावनया ात्त्विको धर्मो जायते। तेष्वीर्ष्याऽपकारेच्छाऽसूयाद्वेषाणां वत्तमलानां विनाशात्तेन च शुक्लेन धर्मेण चित्तं प्रसन्नं भवति। सन्नं च वक्ष्यमाणेभ्य उपायेभ्य एकाग्रं स्थितिपदं लभत इति ात्पर्य्यम्॥ ३३॥

इदानीं मैत्र्यादिभावनया प्रसन्नस्य चित्तस्य स्थित्युपानाह :—

प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥ ३४ ॥

"प्रच्छर्दनं" रेचनं, रेचितस्य प्राणस्य वह्निरेव "विधारणं," यथाशक्ति ताभ्यां चित्तमेकत्र लक्ष्ये स्थितिं लभते। प्राणजं चित्तस्य जयस्तयोरविभागात् प्राणायामस्य सर्वपापनिवर्त्तकत्वात् पापनिवृत्तौ चित्तं स्थिरं भवति। वाशब्दो वक्ष्यमाणोपायान्तरापेक्षया विकल्पार्थो न तु मैत्र्यादिभावनाऽपेक्षया तद्भावनायाः सर्वोपायसहकारित्वेन समुच्चयादिति मन्तव्यम् ॥ ३४ ॥

उपायान्तरमाह :—

विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ॥३५॥

नासाऽग्रे चित्तस्य संयमाद्दिव्यगन्धसाक्षात्कारो भवति जिह्वाऽग्रे संयमाद्दिव्यरसस्य संविद्भवति, तालुनि रूपसंवित्, जिह्वामध्ये स्पर्शसंवित्, जिह्वामूले शब्दसंवित्, एताः संविदो गन्धादिविषयवत्यः प्रवृत्तयः शीघ्रमुत्पन्नाः सत्यो विश्वासमुत्पाद्यातिसूक्ष्मे खरादौ "मनसः" स्थितिं निबध्नन्तीत्यर्थः। शास्त्रोक्तविशेषस्य कस्यचिदनुभवे सत्यतिसूक्ष्मेऽपि श्रद्धया संयमार्थं योगो प्रवर्त्तत इति भावः ॥ ३५ ॥

विशोका वा ज्योतिष्मती ॥ ३६ ॥

अष्टदलं हृत्पद्मं रेचकेनोर्द्धमुखं ध्यात्वा तत्कर्णिकायाम् ऊर्द्धमुख्यां सुषुम्नाऽऽख्यनाड्यां संयमनान्मनसः संविद् भवति। तच्चनः सूर्येन्दुग्रहमणीनां या या प्रभा तद्रूपेणानेकधा भवति तत्सात्विकं ज्योतिर्मनः। तस्य कारणं सात्विको

हङ्कारो निस्तरङ्गमहोदधिकल्पो व्यापी। तस्यापि ज्योतिः-
रूपस्य संयमात् संविद्भवति। सैषा द्विविधा संविद्। ज्योति-
ातो मनोऽहङ्काराख्या ज्योतिर्विषया, विशोका दुःखशून्या,
वृत्तिरुत्पन्ना मनसः स्थितिहेतुरित्यर्थः ॥ ३६ ॥

वीतरागविषयं वा चित्तम् ॥ ३७ ॥

व्यासशुकादीनां "वीतरागं" यच्चित्तं तद्विषयं तत्र धार्य्यमाणं
ोगिनः "चित्तं" स्थितिपदं लभत इत्यर्थः ॥३७॥

स्वप्ननिद्राज्ञानालम्बनं वा ॥ ३८ ॥

ज्ञानशब्दो ज्ञेयपरः। स्वप्ने भगवतो मूर्त्तिमत्यन्तमनो-
रामाराधयन्नेव प्रबुद्धः तत्रैव चित्तं धारयेत्। निद्रायां सुषुप्तौ
त् सुखं जायते तत्र धारयेत्। एवं स्वप्ननिद्राज्ञेयालम्बनं चित्तं
स्थितिं लभते ॥३८॥

यथाऽभिमतध्यानाद्वा ॥ ३९ ॥

किं बहुना यदेवेष्टं शिवरामकृष्णादिरूपं तदेव ध्यायेत्।
त्र लब्धस्थितिकमन्यत्रापि स्थितिं लभते। अभिमतमनति-
म्य "यथाऽभिमतं" तस्य "ध्यानात्" इति विग्रहः ॥३९॥

ननु चित्तस्थितिर्जायत इत्यत्र किं ज्ञापकमित्यत्राह :—

परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥४०॥

"अस्य" चित्तस्य सूक्ष्मे निविशमानस्य यः परमाण्वन्तो
वशीकारः" अप्रतिघातः। तथा स्थूले निविशमानस्य परम-
हत्त्वाकाशान्तोऽप्रतिघातः। तेन परेण वशीकारेण चित्तं
ब्धस्थितिकमिति ज्ञात्वा स्थित्युपायानुष्ठानादुपरमतीत्यर्थः ॥४०॥

एवं चित्तस्थितेरुपाया उक्ताः। ज्ञापकश्च वशीकार उक्तः।

सम्प्रति लब्धस्थितिकस्य चित्तस्य किं विषयः किं रूपश्च संप्रज्ञातो योगो भवत्यत उत्तरं पठति :—

क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ॥ ४१ ॥

यथा "अभिजातस्य" कुलीनस्यातिस्वच्छस्य स्फटिक "मणेः" जपाकुसुमाद्युपरक्तस्य स्वरूपाभिभवेन रक्ताद्याकारता भवति, तथाऽभ्यासवैराग्याभ्यां क्षीणरजस्तमोवृत्तिकस्य चित्तमणेः स्थूलसूक्ष्मभूतात्मकग्राह्येण ग्रहणैरिन्द्रियैर्ग्रहीता पूर्वोक्तास्मिताऽख्यपुरुषेण चोपरक्तस्य स्वरूपाभिभवेन या ग्राह्याकारताऽऽपत्तिः स संप्रज्ञातः। पूर्वोक्तवितर्कविचारानन्दास्मिताऽनुगमाच्चतुर्विधश्चतुर्विषयकः प्रत्येतव्यः। अत्र सूत्रेऽर्थक्रमबलात् पाठं भङ्क्त्वा ग्राह्यग्रहणग्रहीतृषु तदुपरक्तस्य चित्तस्य "तदञ्जनता" स्वरूपपरित्यागेन तद्रूपता तस्याः सम्यगापत्तिरिति व्याख्येयम्। स्थूलसूक्ष्मक्रमेणैव चित्तस्य ग्रहीतृपरागात् "तत्स्थेति" भिन्नं पदम्। अविभक्तिकं स्यान्तं कृत्वा क्षीणवृत्तेः तत्स्थस्येति योज्यम्। यद्वा "तत्स्थं" च "तदञ्जनं" च तस्य भावस्तत्ता। क्षीणवृत्तेस्तया "समापत्तिः" इत्यर्थः ॥४१॥

सेयं संप्रज्ञाताख्या समापत्तिः पुनरवान्तरभेदाच्चतुर्धा भवति। सवितर्का, निर्वितर्का, सविचारा, निर्विचारा चेति तत्र सवितर्कायाः स्वरूपमाह :—

तत्र शब्दार्थज्ञानविकल्पैः सङ्कीर्णा सवितर्का ॥४२॥

"तत्र" तासु समापत्तिषु मध्ये सवितर्का समापत्तिरेषा ज्ञेया। तथा हि। गौरित्युक्ते शब्दार्थज्ञानानि त्रीण्यभिन्नानि भासन्ते। तत्र गौरिति शब्द इत्येको विकल्पः, अयं हि गौरि

ुपात्तयोरर्थज्ञानयोः शब्दाभेदविषयकः। तथा गौरित्यर्थ त्येको विकल्पः, तत्र गौरित्युपात्तयोः शब्दज्ञानयोरर्थाभेद-षयकः। एवं गौरिति ज्ञानमित्येको विकल्पः, अयं तु गौरि-ुपात्तयोः शब्दार्थयोर्ज्ञानाभेदगोचरः। त एते विकल्पाः, असद-दगोचरत्वात्। एवं घटः पट इत्यादयो विकल्पा ज्ञेयाः। त्र शब्दज्ञानाभ्यामभेदेन विकल्पिते स्थूले गवाद्यर्थे समाहित-चित्तस्य योगिनः समाधिजन्यसाक्षात्कारो यथा कल्पितार्थमेव ृह्णाति तथा सा समाधिप्रज्ञा शब्दार्थज्ञानानां विकल्पैः 'सङ्कीर्णा" तैस्तुल्या भवति विकल्पत्वाविशेषात् सा सङ्कीर्णा 'सवितर्का" समापत्तिरित्यर्थः॥ ४२॥

निर्वितर्कामाह :—

स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का॥ ४३॥

गवादिशब्दानां शक्तिरूपः सङ्केतो विकल्पितार्थेष्वेव ोके गृह्यते तस्य स्मृत्या शाब्दज्ञानं परार्थानुमितिश्च विकल्प व जायते। तथा च श्रुते वाऽनुमिते वाऽर्थे श्रुत्यनुमिति-रूपविकल्पमूला समापत्तिः सवितर्का भवति "स्मृतिपरिशुद्धौ" त्याम् अर्थमात्रतात्पर्य्यवता चित्तेनार्थमात्राध्यासात् सङ्केत-स्मृतेस्त्यागे सति तत्कार्य्यस्य विकल्पस्य त्यागात् समाधिप्रज्ञा ीयं ग्राहकत्वं प्रज्ञारूपं यत्तेन "शून्येव" भूत्वाऽर्थमात्र-निर्भासादविकल्पितार्थरूपं यद्ग्राह्यं तत्स्वरूपेणैव निर्भास्य-माना "निर्वितर्का" समापत्तिरित्यर्थः। तत्र सवितर्कसाक्षा-त्कारो यस्तदपरं प्रत्यक्षं विकल्पत्वात्। निर्वितर्कप्रत्यक्षं तु रं सत्यार्थविषयत्वात्। स च सत्यार्थो गोघटादिरवयवी ज्ञेयः।

अत्र परमाणुपुञ्जातिरिक्तोऽवयवी नास्तीति बौद्धमतमाशङ्क्य महानेको घट इत्यबाधितानुभवादस्ति, स चास्माकं मते भूत सूक्ष्मरूपाणां परमाणूनां परिणामः। तस्य च स्वोपादाने भेदाभेदात्मकं तादात्म्यमिति "भाष्ये" साधितम् ॥ ४३ ॥

एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥ ४४ ॥

स्थूलपरिणामघटादिषु उपादानत्वेनानुगता ये परमाणवः पञ्चतन्मात्राणां विकारा भूतरूपेण संस्थिताः सूक्ष्मास्तेषु विषयेषु स्वीयकार्य्यकारणदेशकालनानाविशेषणविशिष्टेषु स्ववाचकशब्दज्ञानाभ्यामभेदेन विकल्पितेषु या समापत्तिः सा "सविचारा" इति उच्यते। तेष्वेव सर्वविशेषणशून्येष्वर्थमात्रेषु परमाणुषु या समापत्तिः सा "निर्विचारा"। सा खलु सत्यार्थमात्रस्वरूपा समाधिप्रज्ञा स्वरूपशून्येव निर्भासते। तया च स्थूलगोचरया सवितर्कया निर्वितर्कया च व्याख्यातया सूक्ष्मविषया "सविचारा" "निर्विचारा" च व्याख्याता भवतीत्यर्थः ॥ ४४ ॥

ननु किमस्याः ग्राह्यसमापत्तेः परमाणुष्वेवावसानमित्याह :—

सूक्ष्मविषयत्वं चालिङ्गपर्य्यवसानम् ॥ ४५ ॥

अस्याः समापत्तेः "सूक्ष्मविषयत्वं" अलिङ्गे प्रधाने पर्य्यवस्यति। तथाहि। पार्थिवः परमाणुर्गन्धतन्मात्रादितरतन्मात्राङ्गकाज्जायते। आप्यस्तु गन्धतन्मात्रवर्ज्जिताद्रसतन्मात्रादितरतन्मात्राङ्गकाद्। तैजसस्तु गन्धरसद्वयवर्ज्जिताद्रूपतन्मात्रादितरद्वयाङ्गकाद्। वायव्यस्तु पूर्वहीनात् स्पर्शतन्मात्राच्छब्दतन्मा

ङ्कात्। नभसः परमाणुत्वे कस्मादेव शब्दतन्मात्राज्जायत
ते प्रक्रिया। अतो विकारेभ्यः परमाणुभ्य उपादानानि पञ्च-
मात्राणि सूक्ष्माणि, तेभ्योऽप्यहङ्कारः सूक्ष्मः, तस्मादपि महान्,
इतोऽपि प्रधानं, तद्धि लयं न गच्छतीत्यलिङ्गमुच्यते। ततः
सूक्ष्ममुपादानं नास्ति पुरुषस्य सत्त्वेऽप्यनुपादानत्वात्।
षो हि भोगापवर्गार्थी सन् पुरुषार्थनिमित्तके सर्गे निमित्त-
त्वं भवति। तस्मात् सूक्ष्मग्राह्यसमापत्तिः प्रधानपर्य्यन्तेति
द्धम् ॥ ४५ ॥

एवं स्थूले सूक्ष्मे च ग्राह्ये चतस्रः समापत्तय उक्ताः सम्प्रति
सां संप्रज्ञातत्वमुपसंहरति :—

ता एव सबीजः समाधिः ॥ ४६ ॥

ग्रहणग्रहीतृरपि सविकल्पत्वनिर्विकल्पत्वभेदेन सानन्दा,
नन्दमात्रा, सास्मिता, अस्मिता चेति चतस्रः समापत्तयो
न्ति उक्तन्यायसाम्यात्। एवमष्टसमापत्तयो याः "ता"
ः" "सबीजः" समाधिः" संप्रज्ञातः। विवेकख्यात्यभावेन
वीजसत्त्वात् सबीजत्वं द्रष्टव्यम् ॥ ४६ ॥

तत्र निर्विचारसमापत्तेः फलतोऽतिशयमाह :—

निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥ ४७ ॥

रजस्तमोमलापेतस्य बुद्धिसत्त्वस्य स्वच्छस्थितिरूपवृत्ति-
हः प्रधानान्तसूक्ष्मग्राह्यगोचरः यः सोऽयं निर्विचारसमाधे-
रद्यं तस्मिन् सत्यक्रमेण परमाण्वादिप्रधानान्ततत्त्वसमूहा-
नः स्वात्मनिष्ठः "अध्यात्मप्रसादः" भवतीत्यर्थः ॥ ४७ ॥

अस्य प्रसादस्य योगिसम्मतां संज्ञामाह :—

ऋतम्भरा तत्र प्रज्ञा ॥ ४८ ॥

तत्र वैशारद्ये सति या प्रज्ञा निर्विचारा समाधिजन्या तस्य ऋतम्भरेति संज्ञा भवति। ऋतमविकल्पितं सत्यं बिभर्तीति व्युत्पत्तेरित्यर्थः। तस्याः क्षुप्रमाणेभ्यो विषयताविशेषमाह ॥ ४८ ॥

श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥ ४९ ॥

गवादिशब्दानां गोत्वादिसामान्ये शक्तिः, न व्यक्तिविशेषेषु तेषामानन्त्ये नाशक्यग्रहत्वात्। एवं व्याप्तिरपि वह्नित्वादिसामान्यं गृह्यते। अतः श्रुतानुमानप्रज्ञयोः सामान्यं वस्तु विषयः। तथा हि लोके शब्दलिङ्गज्ञानानन्तरं गोवह्न्यादिवस्तुमात्रं ज्ञायते न व्यक्तिविशेष इति स्वसाक्षिकमेतत्। ऐन्द्रियिकप्रत्यक्षं यद्यपि गोपटादिविशेषविषयं तथाऽपि सूक्ष्मव्यवहितविप्रकृष्टवस्तुविशेषः समाधिप्रज्ञाया असाधारणो विषयः। न च सूक्ष्मादिषु श्रुतानुमानप्रकाशितेषु प्रसरन्ती समाधिप्रज्ञा कथं स्वमूलश्रुतानुमानागोचरविशेषगोचरा स्यादिति वाच्यम्? बुद्धेः स्वतः सर्वग्रहणशक्तत्वात्। बुद्धिसत्त्वं हि प्रकाशस्वभावं सर्वार्थग्रहणसमर्थमपि तमसाऽऽवृतं सद् मानमपेक्ष्याल्पविषयं भवति। यदा तु समाधिना विगततमःपटलं सर्वतः प्रकाशमानमतिक्रान्तमानमर्य्यादं भवति तदा प्रकाशानन्त्यात् किं नामागोचरः स्यात्। तस्मात् समाधिप्रज्ञा विशेषार्थगोचरत्वाद् मानान्तरविषयादन्यविषयेत्यर्थः। तदुक्तम् :—

"प्रज्ञाप्रसादमारुह्य ह्यशोच्यः शोचतो जनान्।
भूमिष्ठानिव शैलस्थः सर्वान् प्राज्ञोऽनुशोचति॥" इति।

जनान् समाधिशून्यान् मानभृत्यानित्यर्थः ॥४९॥

नन्वनादिना शब्दादिविषयभोगसंस्कारेणातिबलीयसाऽभिहता समाधिप्रज्ञा न स्थितिं लभत इत्यत आह :—

तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥५०॥

निर्विचारसमाधिप्रज्ञाजन्यः, "संस्कारो" व्युत्थानसंस्कारस्य "प्रतिबन्धी" बाधक इत्यर्थः। अनादिरपि व्युत्थानसंस्कारस्तत्त्वा-स्यर्थित्वात् तत्त्वस्यर्थिप्रज्ञासंस्कारेण बाध्यते। तद्बाधे व्युत्थान-प्रत्यया न भवन्ति। समाधिप्रज्ञा तु भवति। ततः संस्कारः पुनः पुनरिति समाधिसंस्कारोपचयात् सर्वात्मना क्लेशक्षये सति भोगा-न्निर्विण्णं चित्तं पुरुषाभिमुखं विवेकख्यातिं कृत्वा कृतकृत्यं लीनं भवति समाप्ताधिकारत्वात् ख्यातिपर्य्यवसानं हि चित्तचेष्टित-मिति ॥ ५० ॥

ननु सम्प्रज्ञातसमाधिप्रज्ञासंस्कारप्रचुरं चित्तं तत्प्रज्ञापरम्परा-मेव कुर्वत् कथं निर्बीजसमाधिं कुर्य्यादित्यत आह :—

तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः॥५१

पुरुषख्यात्यनन्तरं परवैराग्यसंस्कारप्रचयेन "तस्य" संप्रज्ञात-समाधिप्रज्ञासंस्कारस्य "अपि" शब्दात् प्रज्ञायाश्च "निरोधे" सति सर्वस्य प्रज्ञातज्जसंस्कारप्रवाहस्य निरोधादवसिताधिकारत्वेन चित्तस्य कृत्याभावात् "निमित्तापाये नैमित्तिकापाय" इति-न्यायेन निर्बीजः समाधिर्भवति। तदुक्तम् :—

"आगमेनानुमानेन ध्यानाभ्यासरसेन च।
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥" इति।

श्रवणेन, मननेन, पुरुषमात्रध्यानाभ्यासो धर्ममेघाख्यः तद्रूपेण परवैराग्येण प्रज्ञाप्रसादात्मना, पुरुषं साक्षात्कुर्वन्निर्बीजं योगं लभत इत्यर्थः। कालक्रमेण निर्बीजनिरोधसंस्कारप्रचये

सम्प्रज्ञातो चित्तं लीयते हेत्वभावात्। कृत्यशेषलक्षणाधिकारो हि चित्तस्य स्थितिहेतुः। न हि कृतभोगविवेकख्यातिनश्चित्तस्य कृत्यशेषोऽस्ति। तस्माच्चित्तस्य प्रलये पुरुषः स्वरूपमात्रप्रतिष्ठः केवलो मुक्त इति सिद्धम् ॥ ५१ ॥

इति समाधिपादः ॥ १ ॥

साधनपादः ।

पूर्वस्मिन् पादे योगमुद्दिश्य लक्षणमुक्त्वा वृत्तीर्निरूप्य तन्निरोधोपायाभ्यासवैराग्ये प्रतिपाद्य चित्तस्थित्युपायान् कांश्चिदुक्त्वा द्विविधो योगः सावान्तरभेदः प्रतिपादितः। तत्राभ्यासवैराग्ये चित्तशुद्धिसाध्ये इति मत्वा तस्य शुद्धिहेतुमादौ क्रियायोगमाह :—

तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥१॥

पूर्वपादोक्तस्य योगस्यास्मिन् पादे साधनान्युच्यन्त इत्यनयोः पादयोः सङ्गतिः। ब्रह्मचर्य्यगुरुसेवासत्यवचनकाष्ठमौनाकारमौनस्वाश्रमधर्मद्वन्द्वसहनमिताशनादिकं "तपः"। न कायशोषः। धातुवैषम्ये योगविघातात्। "स्वाध्यायः" प्रणवश्रीरुद्रपुरुषसूक्तादीनां पवित्राणां जपो मोक्षशास्त्राध्ययनं च। फलाभिसन्धिं विना कृतानां कर्मणां परमगुरावीश्वरे समर्पणं "ईश्वरप्रणिधानं" तानि क्रियारूपो योगो योगसाधनत्वादित्यर्थः।

क्रियायोगस्य फलमाह :—

समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥२॥

निविड़ेषु क्लेशेषु सत्सु समाधिर्न सिध्यति। तस्मात् क्रिया-

योगः क्लेशान् तनूकृत्य समाधिं भावयति। तनूकरणं क्लेशानां सदोद्भवतां कादाचित्कउद्भवः। भावनं समाधेरुत्पादनम्। तदर्थः फलं यस्य स तथोक्तः। क्रियायोगेन क्लेशच्छिद्रेषु लब्धावसरः समाधिः विवेकख्यातिमुत्पाद्य सवासनक्लेशान् दग्धतीति भावः॥२॥

अथ क्लेशाः कीदृशाः कियन्तो वेत्यत आह :—

अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः॥३॥

क्लिश्यन्ति कर्मतत्फलप्रवर्त्तकाः सन्तः पुरुषं दुःखाकुर्वन्तीति "क्लेशाः" ते च "पञ्च" इत्यर्थः॥ ३॥

तत्र चतुर्णामविद्याकार्य्यत्वेनाविद्याऽऽत्मत्वमाह :—

अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्॥ ४॥

उत्तरेषामस्मितादीनाम् "अविद्या" "क्षेत्रं" प्रसवभूमिः। तेषामवान्तरभेदमाह। प्रसुप्तेति। प्रसुप्ताः, तनवो, विच्छिन्ना, उदाराश्च तेषाम्। तत्र विदेहप्रकृतिलयानां योगिनां क्लेशाः प्रसुप्ताः विवेकख्यात्यभावेनादग्धतया शक्तिरूपेणावस्थानात् अत एवाम्ते पुनरुद्भवन्ति। क्रियायोगिनां तनवः। विषयसङ्गिनां विच्छिन्ना, उदाराश्च भवन्ति। यथा चैत्रस्य यस्यां रागस्तत्र क्रोधो विच्छिन्नो रागः उदारः। एवं यत्र क्रोध उदारस्तत्र रागो विच्छिन्नः, कालेनोदारो भूत्वा पुरुषपशुं क्लेशयति। एते क्लेशा अविद्यामूलाः। तस्याः पुरुषापरोक्षख्याया निवृत्तौ निवर्त्तन्ते। यथा जीवन्मुक्तस्य क्लेशाः। क्षीणा इति पञ्चमी क्लेशानामवस्था द्रष्टव्या॥ ४॥

तेष्वविद्यारूपमाह

RAMAKRISHNA MISSION INSTITUTE OF CULT
LIBRARY

अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखा-
त्मख्यातिरविद्या ॥ ५ ॥

अतस्मिंस्तद्बुद्धिरित्यर्थः । अमरा देवा इत्यनित्येषु नित्यत्व-भ्रान्त्या देवत्वार्थं कर्म कृत्वा बध्यन्ते । एवमशुचौ स्त्रीकाये शुचित्व-भ्रान्त्या बध्यन्ते । तदुक्तं भगवता वेदव्यासेन :—

"स्थानाद्बीजादुपष्टम्भान्निष्यन्दान्निधनादपि ।
कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः ॥" इति ।

विण्मूत्रसङ्कुलं मातृजठरं स्थानं, शुक्रशोणितं बीजम्, अन्न-परिणामश्लेष्मादिरुपष्टम्भः, सर्वद्वारैर्मलानां स्रवणं निष्यन्दः, निधनं मरणं, तेन हि श्रोत्रियकायोऽप्यत्यन्ताशुचिर्भवति । आधेयशौचत्वं स्नानानुलेपनादिना शुचित्वापादनं, तथा परि-णामदुःखे भोगे सुखत्वभ्रान्तिः । अनात्मनि बुध्यादावात्मत्व-ख्यातिः । "अविद्या" तत्त्वविद्याविरोधिनीत्यर्थः । यद्यपि शुक्ति-रूप्याद्यविद्याः सन्ति तथाऽपीयं चतुर्विधैवाविद्या बन्धमूलमिति भावः ॥ ५ ॥

दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥ ६ ॥

दृक्शक्तिः पुरुषः, दृश्यत इति दर्शनं तच्छक्तिः बुद्धिः, शक्ति-शब्दो योग्यताऽर्थकः भोक्तृभोग्यत्वयोग्ययोरत्यन्तविविक्तयोर्दृग्-दृश्ययोरविद्याकृतैकात्मता तादात्म्यम्, "इव" शब्देनाहमस्मीति-भ्रान्तिकृतत्वं तादात्म्यस्य द्योतयति । सा "अस्मिता" इत्यर्थः । अयं हृदयग्रन्थिरित्युच्यते ब्रह्मवादिभिः ॥ ६ ॥

अस्मितायाः कार्यं रागं निरूपयति :—

सुखानुशयी रागः ॥ ७ ॥

सुखानुभवे सति स्मृत्या तज्जातीयसुखान्तरे तत्साधने वा या तृष्णा स "रागः" सुखमनुशेते विषयीकरोतीति "सुखानुशयी" इत्यर्थः ॥ ७ ॥

दुःखानुशयी द्वेषः ॥ ८ ॥

दुःखानुभवितुः स्मृत्या दुःखतत्साधनयोर्यः क्रोधः स द्वेष इत्यर्थः ॥ ८ ॥

स्वरसवाही विदुषोऽपि तथारूढ़ोऽभिनिवेशः ॥९॥

"विदुषो", मूर्खस्य वा जन्तुमात्रस्य यो मरणत्रासः सः "अभिनिवेशः"। यथा मूर्खस्याहं सदा स्यामिति रूढ़त्रासः तथा विदुषोऽपि रूढ़ो दृश्यते। यतः "स्वरसवाही" सः पूर्वजन्मस्वसङ्कन्मरणदुःखानुभवजन्यवासनासङ्गः स्वरसः। तेन वहति प्रवहतीति स्वरसवाही। अनेन भयेन देहातिरिक्तात्मा भाष्ये प्रसङ्गादर्शितः। दृश्यते हि जातमात्रस्य बालस्य मरणाद्भयं तच्च पूर्वमरणस्मरणं विनाऽनुपपन्नमिति। एते चाविद्याऽऽदयः पञ्च क्रमेण तमो, मोहो, महामोहः, तामिस्र, अन्धतामिस्र, इत्युच्यन्ते। तत्राव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वष्टस्वनात्मस्वात्मबुद्धिरविद्या तमः, अणिमाद्यष्टैश्वर्येषु अणुरस्मि महानस्मीति तादात्म्यं मोहः, तेन दिव्यादिव्यभेदेन शब्दादिदशविषयेषु रागो महामोहः, क्वतश्चिदैश्वर्यविघाते तन्निमित्तकदशविषयभोगलाभे सत्यष्टादशेष्टविघातके द्वेषस्तामिस्रः, एतेषामेवाष्टादशानामिष्टानां नाशाद्भयमन्धतामिस्र, इति। तथा च सांख्यकारिका :—

"भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ॥" इति ॥ ८ ॥

ते च पञ्चक्लेशा द्विविधाः । पुरुषख्यात्या दग्धाः संस्कार-रूपाः सूक्ष्माः, क्रियायोगेन मैत्र्यादिभावनारूपपरिकर्मणा च तनूकृताः स्थूला, इति । तत्र सूक्ष्माणां हानोपायमाह :—

ते प्रतिप्रसवहेयाः सूक्ष्माः ॥ १० ॥

चित्तस्य कृतकृत्यस्यास्मितायां स्वप्रकृतौ प्रलयः "प्रतिप्रसवः" तेन "हेयाः" "सूक्ष्माः" "ते" क्लेशाः । धर्मिनाशादेव तद्धर्माणां संस्काराणां नाश इत्यर्थः ॥ १० ॥

स्थूलानां हानोपायमाह :—

1/80/L **ध्यानहेयास्तद्वृत्तयः ॥ ११ ॥**

याः क्रियायोगेन विरलाः क्लेशवृत्तयः स्थूलाः सुखदुःखमोहात्मिकाः, ताः पुरुषध्यानेनैव हातव्या इत्यर्थः । यथा लोके वस्त्रस्यातिस्थूलो मलः प्रक्षालनेनैवाशु शोध्यते । पश्चाद्विरलः क्षार-संयोगादिना । मलवासना तु वस्त्रनाशेनैव नश्यति । तथा क्रियायोगेनातिनिबिड़ाः क्लेशा विरला भवन्ति । विरलासु ध्यानेन तनूकृताः । सूक्ष्मासु चित्तनाशेन नश्यन्तीति भावः ॥११॥

क्लेशान्निरूप्य ननु कथं तेषां क्लेशत्वमित्याशङ्क्य कर्मणस्तत्फलमूलत्वेन बन्धकत्वात्तेषां क्लेशत्वमित्याह :—

क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः ॥१२॥

अत्र त्रिभिः पदैः क्रमेण कर्मणो हेतुस्वरूपकार्य्याण्युच्यन्ते । आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः कर्मणां धर्माधर्मरूपः संस्कारः । क्लेशाः कामक्रोधादयो मूलमस्येति "क्लेश-मूलः" । स च द्विविधः । दृष्टजन्मवेदनीयः, अदृष्टजन्मवेदनीय श्चेति । येन देहेन कर्म कृतं तद् दृष्टं जन्म, तेनैव देहेन भोक्तव्य

आद्यः। यथा नन्दीश्वरो बाल एव मनुष्यदेहेन तीव्रसंवेगेन मन्त्रतपःसमाधिभिः ईश्वराराधनं कृत्वा सद्य एव देवत्वजातिं, दीर्घमायुः, दिव्यभोगांश्च लब्धवान्। तथा विश्वामित्रो जात्यायुषी लब्धवान्। तथा भीतव्याधितकृपणविश्वस्तमहाऽनुभावेषु कृतोऽपराधः सद्य एव पच्यते। यथा नहुषस्य महर्ष्यपराधेन सद्यः सर्पत्वमभवत्। द्वितीयस्तु जन्मान्तरभोग्यस्वर्गनरकादिहेतुः "कर्माशयः" इत्यर्थः॥ १२॥

अयं क्षीणक्लेशानां नास्तीति विशेषमाह :—

सति मूले तद्विपाको जात्यायुर्भोगाः॥ १३॥

क्लेशरूपे "मूले" "सत्येव" कर्मणो "विपाकः" फलं भवति। न ह्यक्लेशो भुङ्क्ते। न ह्यकामस्य क्वचिदपि कर्मजे फले सुखबुद्धिरस्ति। न ह्यनुद्वेगः शोचति। अतो विवेकख्यात्यग्निदग्धेषु क्लेशेषु कर्मबीजं वितुषव्रीह्यादिवत् न फलं प्रसूते। स विपाकस्त्रिविधः। जातिर्जन्म देवत्वादिर्वा, आयुश्चिरकालं देहप्राणयोर्योगः, इन्द्रियैर्विषयानुभवो भोग, इति। तत्र भोगो मुख्यः, जात्यायुषी तच्छेष, इति विभागः। तत्रैकस्मिन् देहे वैचित्रभोगदर्शनादनेकानि कर्माणि मरणकालाभिव्यक्तानि एकं जन्मारभन्त इत्येकभविकः कर्माशय उच्यते। तस्य क्वचिज्जातिः, क्वचिदायुः, क्वचिद्भोगः, क्वचिद् द्वयं, क्वचित्त्रयमिति फलवैचित्र्यं ज्ञेयम्। तदुक्तं भगवता "गहना कर्मणो गतिः" इति.। विस्तरस्तु भाष्ये द्रष्टव्यः॥ १३॥

अधना जात्यादीनां हेयत्वार्थं फलमाह :—

ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्॥ १४॥

"ते" जन्मायुर्भोगाः। पुण्यहेतुकाः सुखफलाः। अपुण्यं

पापं तद्धेतुका दुःखफला । अत्र भोगो विषयानुभवः । मिश्रास्तु- "सुखदुःखानुभवो भोगः तस्य कर्मतया साध्यत्वेन सुखदुःखे फले गमनस्येव ग्रामः" इत्याहुः ॥ १४ ॥

ननु ते दुःखफला हेया भवन्तु सुखफलास्तु कथं हेया इत्यत आह :—

परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥ १५ ॥

"परिणामः" अन्यथाभावः । "तापः" वर्त्तमानः । "संस्कारः" भूतः । एतान्येव दुःखानि तैरिति विग्रहः । तथा हि । विषयसुखभोगात् कामानलो वर्द्धते । वृद्धौ सत्यां काम्यालाभे दुःखमवश्यं भावि । लाभेऽपि कुतश्चिद्भोगसङ्कोचे दुःखम् । सङ्कोचके द्वेषः । ततः कामद्वेषाभ्यां पापोपचयाद् दुःखम् । अमङ्कोचे व्याधिः पापञ्च । ततो दुःखमेवं भोगस्य परिणामदुःखता । तथा सुखभोगकाले विषयनाशभीत्या दुःखं वर्त्तते । नाशके द्वेषाच्च तापोऽस्तीति तापदुःखता भोगस्य । तथा सुखभोगनाशे संस्कारो भवति तेन स्मृत्या रागे सति पुण्यापुण्योपचयात्स्व दुःखभोगः पुनः संस्कार इत्यनन्ता दुःखसन्ततिः । यदि भोगनाशे संस्कारो न स्यात् तदा न दुःखसन्ततिः । भवत्येव तु संस्कार इति संस्कारदुःखता । इमानि दुःखानि विवेकिनोऽक्षिपात्रकल्पस्य योगिन उद्वेजकानि । न तु कठिनचित्तानां कर्मिणाम् । यथाऽक्षिपात्रं मृदुकल्पः ऊर्णातन्तुरपि उद्वेजयति नान्यमवयवम् । तस्माद्विवेकिनः सर्वमेव भोगसाधनं विषमिश्रान्नवद्दुःखमेव "परिणामतापसंस्कारदुःखैः" योगाद् "गुणवृत्तिविरोधाच्च" । गुणाश्चित्तात्मना परिणतानि सत्त्वरजस्तमांसि तेषां वृत्तयः सुखदुःखमोहास्तासां विरोधः परस्परमभिभाव्याभि-

भावकत्वं तस्मादित्यर्थः। चलं हि गुणवृत्तं तत्र चित्ते या गुण-वृत्तिराविर्भवति धर्मोन्मिवात्मा पुनरधर्मोन्मिवाद्धर्माभिभवे सति तिरोभवति। दुःखत्वं स्वाभाविकं तस्याः स्फुटयति स्वभावतो दुःखरूपैव सुखवृत्तिः दुःखात्मकरजोमिश्रसत्त्वपरिणामत्वात् किन्तु स्वकाले सत्त्वप्राधान्यात्तस्यां दुःखत्वमस्फुटं रजसः सत्त्व-तिरोभावे सति स्फुटेयमिति सुखदुःखयोर्भेदव्यपदेशः। एतेन सुखस्य मोहत्वं व्याख्यातम्। अतो गुणपरिणामात्मकं सर्वमेव जगद् दुःखमोहात्मकं हेयमिति सिद्धम् ॥ १५ ॥

तत्र यथा चिकित्साशास्त्रे रोगो, रोगहेतुः, आरोग्यं, तद्धेतु-रिति चतुष्टयं व्युत्पाद्यं तथाऽस्मिन्नपि शास्त्रे हेयं, हेयहेतुः, मोक्षः, तद्धेतुरिति चतुष्टयं व्युत्पादयितुं विशिष्य हेयं दर्शयति :—

हेयं दुःखमनागतम् ॥ १६ ॥

अतीतस्य दुःखस्य भोगेन गतत्वाद्वर्त्तमानदुःखस्य भोगेनैव क्षयात् "अनागतं" एव "दुःखं" "हेयं" इत्यर्थः ॥ १६ ॥

हेयहेतुमाह :—

द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥ १७ ॥

द्रष्टा चिद्रूपः पुरुषो बुद्धिस्थस्वच्छायाऽऽत्मकदर्शनवान्। दृश्यं बुद्धिसत्त्वम्। तयोः "संयोगः" स्वस्वामिभावः। बुद्धिसत्त्वं हि विविधशब्दाद्याकारेणेन्द्रियादिद्वारा परिणतं चिच्छायाऽऽ-त्मना पुरुषाभेदेन दृश्यमानं सन्निधिमात्रेणायस्कान्तमणिवदुप-कारकं स्वनिष्ठभोगापवर्गौ पुरुषं दर्शयत् स्वं भवति पुरुषस्य स्वामिनः। सोऽयमभेदभ्रान्तिरूपाविद्याकृतः पुरुषार्थाधीन-स्थितिकः संयोगो हेयस्य दुःखस्य हेतुरित्यर्थः ॥ १७ ॥

दृश्यं प्रपञ्चयति :—

प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगा-
वर्गार्थं दृश्यम् ॥ १८ ॥

प्रकाशशीलं सत्त्वम् । क्रियाशीलं रजः । स्थितिः प्रका
क्रिययोः प्रतिबन्धः तच्छीलं तमः । तत्र सत्त्वं मृदुत्वात्तप्यम
तापकं रजः । एवं सत्त्वरजसोस्तप्यतापकभावे सति मो
भवति पुरुषस्य ममतयेति । तदिदं गुणत्रयं स्वस्वकार्य्ये मिथ
सहायमविवेकि भोग्यं विवेकित्याज्यं परस्पराभिभावकं प
स्पराङ्गाङ्गिभावं सुखप्रकाशलाघवदुःखक्रियोपष्टम्भमोहावर
गौरवकार्य्यलक्षणज्ञेयभेदं स्वतः परस्पराविभागाद् दुर्ज्ञानभे
प्रधानशब्दवाच्यं "भूतेन्द्रियात्मकम्" । भूतानि स्थूला
तन्मात्राणि, इन्द्रियाणि ज्ञानकर्मेन्द्रियाणि दश, बुद्ध्यहङ्का
मनांसि त्रीण्यन्तःकरणानि, आत्मा स्वाभिन्नः परिणामो य
तद् "भोगापवर्गार्थं" भोगमोक्षप्रयोजकं "दृश्यम्" इत्यर्थः ॥१

एतेषां गुणानां परिणामं विभज्य दर्शयति :—

विशेषाऽविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि॥१

विशिष्यन्त इति विशेषा व्यावृत्ताः षोड़शविकाराः खवा
तेजोऽवनयः स्थूलभूतानि पञ्च, ज्ञानकर्मेन्द्रियाणि दश, म
स्वेत्येते षोड़शविकारा एव न तत्त्वान्तरप्रकृतयः । एत
विकाराणां प्रकृतयो बुद्धेर्विकृतयः षड़विशेषाः पञ्चतन्मात्रा
ङ्काराः । अहङ्कारात्पञ्चतन्मात्राणीति "साङ्ख्याः" । अहङ्क
स्यानुजानि बुद्धेरपत्यानि तन्मात्राणीति "योगाः" । तत्र प
तन्मात्राणि शब्दस्पर्शरूपरसगन्धाख्यानि स्थूलभूतानां प्रकृतय
अहङ्कारः सत्त्वेन रजसा उभयेन ज्ञानकर्मेन्द्रियमनसां प्रकृति

यं गच्छतीति लिङ्गं तन्मात्रं महत्तत्त्वं मात्रपदेन च विशेषाऽ-
वेशेषाभ्यां वैलक्षण्यं द्योत्यते। तद्धि निर्विकल्पकाध्यवसाया-
त्मकं प्रधानस्याद्यकार्य्यम्। अलिङ्गं गुणानां साम्यावस्थारूपं
धानम्। एतानि चत्वारि गुणानां पर्वाणि परिणामाः गुणत्वं
तनं प्रति शेषत्वं मन्तव्यम् ॥ १९ ॥

एवं दृश्यं निरूप्य द्रष्टारं निरूपयति :—

द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥२०॥

"द्रष्टा" पुरुषः "दृशिमात्रः" चिन्मात्रो न ज्ञानादिधर्मकः।
ततः "शुद्धः" अपरिणाम्यपि प्रत्ययं बुद्धिवृत्तिमनुसृत्य पश्यतीति
'प्रत्ययानुपश्यः" स्वस्य बुद्ध्यविवेकात् वृत्तिभिरेकीभूतः शब्दा-
दीन् पश्यतीत्यर्थः। तदुक्तं "वृत्तिसारूप्यमितरत्र" इति ॥२०॥

एवं दृश्यद्रष्टारावुक्तौ तयोः शेषशेषित्वमाह :—

तदर्थ एव दृश्यस्यात्मा ॥ २१ ॥

"दृश्यस्य" भोग्यस्य स्वरूपं द्रष्टुरर्थमेव न स्वार्थम् अचेतन-
त्वादित्यर्थः ॥ २१ ॥

ननु तर्हि द्रष्टुः प्रयोजने निष्पन्ने सति कृत्याभावाददृश्यं
धानं निर्व्यापारं स्यात् तथा चाधुना संसारो नोपलभ्येतेत्यत
आह :—

कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥२२

प्रधानमेकं पुरुषा अनन्ता इति स्थितिः। अजामेकामिति
'श्रुतेः"। तत्र प्रधानं यं पुरुषं प्रति भोगापवर्गौ कृतवत् स कृतार्थः
स्वामित्वात्। यथा भृत्येन कृतजयेन स्वामी कृतजय-
इत्युच्यते। तद्दृष्टं "कृतार्थं" मुक्तपुरुषं "प्रति" नष्टमदर्शनं मत-

मपि तदृश्यं "अनष्टं" पुरुषान्तरसाधारणत्वात्। एतदुक्तं भवति पुरुषार्थो ह्यनागतावस्थः प्रधानस्य प्रवृत्तिहेतुः। तत्र कृतार्थं प्रति प्रवर्त्तकाभावात् प्रधानस्याप्रवृतावपि अकृतार्थं प्रति मह-दाद्याकारेण प्रवृत्तिर्घटते। तथा चैकस्य मुक्तौ सर्वेषां मुक्ति-प्रसङ्गो नास्तीति ॥ २२ ॥

एवं दृश्यद्रष्टारौ व्याख्याय हेयहेतुं संयोगं निरूपयति :—

स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥२३॥

स्वं दृश्यं तस्य शक्तिर्जड़त्वेन दृश्यत्वयोग्यता। स्वामी तु पुरुषस्तस्य शक्तिश्चेतनत्वेन द्रष्टृत्वयोग्यता स्वरूपात्मिकैव। तयोः स्वस्वामिस्वरूपयोः शक्त्योः विविधशब्दाद्याकारदृश्यबुद्धिस्वस्व-रूपस्योपलब्धिर्भोगः। स्वामिस्वरूपस्योपलब्धिरपवर्गः। तद्धेतुः "संयोगः" स्वस्वामिभावाख्यः! स एव द्रष्टृदृश्यभावो भोक्तृ-भोग्यभाव इत्याख्यायते। यस्याभावे दृग्दृश्ययोः स्वरूपोप-लब्धिर्न भवति यद्भावे सा भवति स संयोगः कार्य्येणैव ज्ञेय इत्युपदिष्टं भवति ॥ २३ ॥

एवं संयोगस्य स्वरूपं कार्य्यं चोक्त्वा कारणमाह :—

तस्य हेतुरविद्या ॥ २४ ॥

भ्रान्तिज्ञानवासना संयोगस्य कारणमित्यर्थः। अहमिति दृग्दृश्ययोरभेदप्रत्ययो भ्रान्तिः। तद्वासनावासितं चित्तं प्रलये लीनं प्रधानभावमुपगतं सर्गकाले पुरुषं प्रति स्वत्वेनैव जायते। तेन संयोगेनाविवेकिनो बन्धो विवेकिनो मोक्षश्च भवति एतय ह्यनादिवासनाविचित्रया चित्तवर्त्तिन्या अविद्यया समम्। ततो मत्स्यजालमिवानुविद्धं पुरुषपशुं स्वकर्मोपहितं दुःखमुपात्त त्यजन्तं, त्यक्तमुपाददानं, ज्ञातव्य एवानात्मन्यहङ्कारममकारानु

प्रतिनं जातं जातं वाह्याध्यात्मिकोभयनिमित्तास्त्रिपर्वाणस्तापा अनुभवन्ते ॥ २४ ॥

एवं हेयं तद्धेतुं चोपपाद्य हेयस्य हानं मोक्षं व्युत्पादयतिः—

तदभावात् संयोगाभावो हानं तद् दृशेः कैवल्यम् ॥ २५ ॥

तस्या अविद्याया अभावाद्विद्यया नाशात्तत्कार्यस्य बुद्धिपुरुष-संयोगस्य दुःखस्य हेयस्य हेतोरभावो विनाशो "हानं" यत्तदेव "दृशेः" नित्यमुक्तस्य "कैवल्यम्" इत्यर्थः ॥ २५ ॥

मोक्षमुक्ता तद्धेतुमाह :—

विवेकख्यातिरविप्लवा हानोपायः ॥ २६ ॥

दृग्दृश्ययोर्भेदो विवेकस्तस्य ज्ञानं ख्यातिः । विप्लवो मिथ्याज्ञानम् । आदौ खल्वागमात् सामान्यतो विवेकख्यातिरुदेति साऽनाद्यविद्यां न हन्ति परोक्षत्वात् । यदा सा मननेन स्थापित्व सती सर्वतो विरक्तेन पुरुषाभिमुखेन चित्तेन निरन्तरमभ्यस्यते तदा ध्यानप्रकर्षपर्यन्त जा चित्प्रतिबिम्बवती साक्षात्काररूपा सवासनमिथ्याज्ञानं निहन्ती "अवि[illegible]" सती परवैराग्यपूर्वक-निरोधेन संस्कारशेषस्य कृतकृत्यस्य प्रारब्धावसाने आत्यन्तिक-निवृत्तिद्वारा भाविदुःखहानस्य मोक्षस्योपाय इत्यर्थः ॥ २६ ॥

स्थिरविवेकख्यातेर्जीवन्मुक्तस्य ज्ञानवैभवमाह :—

तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ॥ २७ ॥

प्रकृष्टोऽन्तोऽवसानं [illegible] प्रज्ञा इति यावत् । प्रान्ता भूमयोऽवस्था [illegible] प्रज्ञा "—" स्थिराविप्लवाः [illegible] दुषः प्रज्ञा [illegible]

प्रज्ञाऽवस्थास्वरमा भवन्ति। ज्ञातव्यमखिलं ज्ञातमतः परं न किञ्चित् ज्ञातव्यमस्तीत्येका। सर्वजिज्ञासानिवर्त्तकत्वादियं प्रान्ता न ह्रीयमनात्मज्ञस्य सम्भवति ततस्तदालम्बनसमाधिना प्रधानान्त-प्रज्ञायां स्थिरायामपि आत्मजिज्ञासायाः सत्त्वेन तत्प्रज्ञाया अचरमत्वात्। एवमग्रिमावस्थानां प्रान्तत्वं मन्तव्यम्। हातव्याः सर्वे बन्धहेतवो हताः न किञ्चिन्मम हेयमस्तीति द्वितीया। कैवल्यप्राप्तया प्राप्तव्यमखिलं प्राप्तमतोऽन्यन्न किञ्चिदपि मम प्राप्तव्यमस्तीति तृतीया। विवेकख्यातिसम्पादनेन कर्त्तव्यमखिलं कृतं न किञ्चित् कार्य्यमस्तीति चतुर्थी। एताश्चतस्रः कार्य्य-विमुक्तिसंज्ञाः। चित्तविमुक्तिसंज्ञाः तिस्रः। यथा कृतार्थं मे बुद्धि-सत्त्वमित्येका। बुद्ध्यादिरूपा गुणा अपि गिरिशिखरच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सम्प्रतिनास्त-मात्यन्तिकं गच्छन्ति तेषां नास्ति पुनः प्ररोहः प्रयोजनाभावादिति द्वितीया। तथा गुणातीतः स्वरूपमात्रावस्थितश्चिदेक रस इति तृतीया। प्रज्ञाऽवस्थेत्यर्थः। जिज्ञासाजिहासाप्रेप्साचिकीर्षा-शोकभयविकल्पान्तफलाः सप्त प्रज्ञाभूमयः प्रान्ता मन्तव्या इत्यर्थः॥ २७॥

सम्प्रति प्रज्ञासाधनान्याह :—

योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरावि-वेकख्यातेः॥ २८॥

योगाङ्गानां योगस्य चानुष्ठानादशुद्धेः क्लेशकर्मरूपायाः क्रमेण क्षये जायमाने ज्ञानस्य दीप्तिर्विशुद्धिः आनिर्विकल्पविवेक-ख्यातिर्भवतीत्यर्थः। साङ्गयोगानुष्ठानशुद्धिद्वारा प्रज्ञासाधनमिति भावः॥ २८॥

कानि योगाङ्गानीत्यत आह :—

यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-समाधयोऽष्टावङ्गानि ॥ २९ ॥

अन्यानपेक्षत्वेन सफलत्वाद् यमा आदावुच्यन्ते। पश्चात् यमसापेक्षा नियमाः। एतदुभयाधीनशुद्ध्यपेक्षा आसनादय उत्तरोत्तरहेतवः पश्चादुच्यन्ते ॥ २९ ॥

एतेषां योगिभिरुपादेयविशेषमाह :—

अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः ॥३०॥

तत्राहिंसा नाम मनोवाक्कायैः सर्वदा सर्वभूतानामपीडनं परः शुक्ल एष धर्मः। अन्ये यमादयः एतस्या एव शुद्ध्यर्थाः। तथा चोक्तम्। स खल्वयं ब्राह्मणो यथा यथा व्रतानि बह्वनि समादित्सति तथा तथा प्रमादकृतेभ्यो हिंसानिदानेभ्यो निवर्त्तमानस्तामेवावदातरूपामहिंसां करोतीति। सत्यं परहितार्थं यथार्थकथनम्। बलाद्ग्रहसि वा परवित्तहरणं स्तेयं तदभावोऽस्तेयं परद्रव्यास्पृहेत्यर्थः। ब्रह्मचर्य्यम् उपस्थसंयमः। स्त्रियाः प्रेक्षणालापस्पर्शश्रवणध्यानत्यागः तदङ्गम्। अपरिग्रहो नाम देहयात्राऽतिरिक्त-भोगसाधनास्वीकारः। एते पञ्च यमाः योगस्य विरोधिहिंसाऽनृतस्तेयस्त्रीसङ्गपरिग्रहनिरासकत्वेनाङ्गत्वं भजन्ते ॥ ३० ॥

जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ ३१ ॥

जातिर्गोत्वब्राह्मणत्वादिः। देशस्तीर्थादिः। कालो नियतश्चतुर्दश्यादिः। अनियतो ब्राह्मणभोजनाद्यवसरः समयः। तत्र सदा गोब्राह्मणं न हनिष्यामीत्यहिंसा जात्या परिच्छिन्ना।

कमपि तीर्थं वा चतुर्दश्यां वा न हनिष्यामीति देशकालाभ्याम-
वच्छिन्ना। देवब्राह्मणार्थभोजनादिसमयातिरेकेण न हनिष्या-
मीति समयावच्छिन्ना। प्राणिमात्रं क्वचिदपि कस्यापि कृतेऽहं
न हनिष्यामीति जात्यादिभिश्चतुर्भिरनवच्छिन्ना। भवत्यहिंसा
पुष्कला। एवं सत्यादयोऽपि अनवच्छिन्ना ऊहनीयाः। एवं
सर्वासु जात्यादिषु भूमिषु कृताव्यवस्थासु विदिताः सार्वभौमा
महाव्रतमित्युच्यन्त इत्यर्थः॥ ३१॥

नियमानाह :—

शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि
नियमाः॥ ३२॥

शौचं मृज्जलादिकृतं गोमूत्रपावकादिमिथ्याहारकृतं च
बाह्यम्। आन्तरं मैत्र्यादिभावनया चित्तस्यासूयाऽऽदिमल-
राहित्यम्। सन्तोषः सन्निहितप्राणधारणमात्रहेतुना तुष्टिः। तपो
द्वन्द्वसहनं यथायोगं कृच्छ्रादिकं च। स्वाध्यायः प्रणवाद्यभ्यासः।

"ज्ञानतोऽज्ञानतो वाऽपि यत्करोमि शुभाशुभम्।
तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्॥
कर्मणा मनसा वाचा या चेष्टा मम नित्यशः।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि॥"

इति परमगुरौ सर्वपुण्यकर्मार्पणमीश्वरप्रणिधानमित्यर्थः ३२

वितर्कबाधने प्रतिपक्षभावनम्॥ ३३॥

एतेषां यमनियमानां वितर्कहिंसाऽऽदिसङ्कल्पैर्हनिष्याम्येन-
मपकारिणं, अनृतं वक्ष्यामि, परस्वमादास्ये, इत्यादिभिर्बाधने प्राप्ते
सति यमादिपरो ब्राह्मणः प्रतिपक्षभावनं कुर्य्यात् घोरेषु संसा-

यमादिधर्मा: स खल्वहं त्यक्ताऽहिंसाऽऽदीन् पुनस्तानाददान-सुल्य: श्ववृत्तेनेति। यथा श्वा वान्ताशी तथा त्यक्तस्य पुनरादातेति वितर्कप्रतिपक्षान् भावयेदित्यर्थः ॥ ३३ ॥

सम्प्रति वितर्काणां स्वरूपप्रकारकारणावान्तरभेदफलानि पञ्चभिः पदैः क्रमेण वदन् प्रतिपक्षभावनं स्फुटयति :—

वितर्का हिंसाऽऽदयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञा-नानन्तफला इति प्रतिपक्षभावनम् ॥ ३४ ॥

वितर्क्यन्त इति "वितर्का" "हिंसाऽऽदयः" इति स्वरूपोक्तिः। तत्र हिंसा त्रिप्रकारा। स्वयंकृता, कुर्विति कारिता, साधु साध्वि-त्यनुमोदिता चेति। तत्रैकैका पुनस्त्रिविधा भवति कारणभेदात्। मांसचर्मादिलोभेन, अपकृतमनेनेति क्रोधेन, धर्मो मे भविष्य-तीति मोहेन। एवं नवविधा जाता हिंसा। पुनः लोभक्रोधमोहाः प्रत्येकं त्रिविधा भवन्ति मृदुमध्याधिमात्रत्वेन तत्पूर्वका हिंसा-दयोऽपि मृदवो, मध्या, अधिमात्राश्च भवन्ति; तथा कृता, कारिता, अनुमोदिता, च प्रत्येकं नवधा भवतीति हिंसायाः सप्तविंशतिभेदा भवन्ति। मृदुमध्याधिमात्रा अपि प्रत्येकं त्रिधा भवन्ति। मृदुमृदुः, मध्यमृदुः, तीव्रमृदुः, मृदुमध्यः, मध्यमध्यः, तीव्रमध्यः, मृदुतीव्रः, मध्यतीव्रः, तीव्रतीव्र, इति। एवं लोभो नवविधः। एवं क्रोधमोहाविति। तत्पूर्वा कृता हिंसा सप्तविंशति-भेदा भवति। तथा कारितानुमोदिता चेत्येकाशीतिभेदाहिंसा भवति। एवमनृतादिष्वपि योज्यम्। एवंभूता वितर्काः। दुःखं नरकादिकं, अज्ञानं स्थावरादिभावं भ्रान्तिसंशयरूपं, चानन्तं फलयतीति प्रतिपक्षाणां वितर्कशत्रूणां भावनमित्यर्थः। तेन हेयचिन्तनेन वितर्का हेया इत्युपदिष्टं भवति। तद्धाने सति

निर्विघ्ना यमनियमा दश सिध्यन्ति । तत्सिद्धौ चित्तशुद्धिद्वारा कैवल्यम् । अतो योगः सिध्यतीति तात्पर्यम् ॥ ३४ ॥

सम्प्रति दशानां सिद्धिसूचकमवान्तरफलं क्रमेण दर्शयति :—

अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ॥ ३५ ॥

अहिंसासिद्धौ सत्यां तस्याहिंसकस्य मुनिवर्यस्य सन्निधौ स्वभावविरुद्धानामहिनकुलादीनामपि "वैरत्यागो" भवतीत्यर्थः ॥ ३५ ॥

सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ॥ ३६ ॥

"सत्यप्रतिष्ठायां" सत्यां क्रिया धर्माधर्मरूपा, तत्फलं स्वर्गादिकं, तयोराश्रयो वाङ्मात्रेण दाता तस्य भावः तत्त्वं भवति । यथा धार्मिको भूया इत्युक्ते भवति धार्मिकः स्वर्गमाप्नुहीत्युक्तमात्रादधार्मिकोऽपि तथैव भवतीत्यर्थः ॥ ३६ ॥

अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ॥ ३७ ॥

अचौर्य्यदार्ढ्ये सति सर्वेषां दिव्यरत्नानामस्य सङ्कल्पमात्रेण प्राप्तिर्भवतीत्यर्थः ॥ ३७ ॥

ब्रह्मचर्य्यप्रतिष्ठायां वीर्य्यलाभः ॥ ३८ ॥

वीर्य्यनिरोधो हि ब्रह्मचर्य्यं तत्सिद्धौ निरतिशयं सामर्थ्यं भवति । येनाणिमाद्युपस्थितिर्भवति । शिष्येषूपदेशः सद्य फलतीति भावः ॥ ३८ ॥

अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ॥ ३९ ॥

अपरिग्रहशीलस्य तत्स्थैर्य्ये सति अतीतवर्त्तमानभाविजन्मनां या कथन्ता किम्प्रकारता तस्याः सम्यग्बोधो जिज्ञासापूर्वको भवतीत्यर्थः । किं रूपं, जन्म किं प्रकारकं, किं हेतुकं

किं फलकं, किमवसानमिति शरीरपरिग्रहविरोधिनां जिज्ञासा भवति। ततः कार्य्यकारणसम्बन्धः पुरुषस्याजस्य जन्म, नरदेव-तिर्य्यक्त्वप्रकारं, क्लेशकर्महेतुकं, दुःखैकफलकं, पुरुषतत्त्व-सम्बोधावसानमित्याचार्य्यागमतो निश्चित्याशरीरः सन्नपरिग्रह-काष्ठामनुभवतीति भावः॥ ३९॥

उक्ता यमसिद्धयः। अधुना नियमसिद्धय उच्यन्ते :—

शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः॥ ४०॥

यो वाह्यशौचसिद्धः तस्य स्वाङ्गे काये शुद्धिमपश्यतो जुगुप्सा भवति। अशुचिस्वभावोऽयं कायः नात्राहङ्कारः कार्य्य इति। शौचपरस्य मम कायो न शुद्धति, किमु प्रमत्तपरकाय? इति दोषदर्शिनः परकायैरसंसर्गो भवतीत्यर्थः॥ ४०॥

एवं वाह्यशौचसिद्धिमुक्त्वाऽन्तःशौचसिद्धिमाह :—

सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्य-त्वानि च॥ ४१॥

शौचादित्यनुवर्त्तते। भवन्तीति वाक्यशेषः। बुद्धिसत्त्वस्य रजस्तमोमलेर्ष्यादिमलध्वंसः शुद्धिः। ततः सत्त्वोत्कर्षः। ततः स्थैर्य्यम्। ततो वाह्येन्द्रियजयः। ततः पुरुषख्यात्यर्हत्वमिति विभागः॥ ४१॥

सन्तोषादनुत्तमः सुखलाभः॥ ४२॥

तृष्णाक्षयसिद्धा अवश्यं निष्कामस्य निरतिशयसुखानुभवो भवति शुद्धसत्त्वोत्कर्षात्।

तथा च महाभारते ययातिगीता :—

"यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोड़शीं कलाम्॥" इति॥ ४२॥

कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ ४३ ॥

स्वधर्मैकच्छ्रचान्द्रायणादिना क्लेशपापक्षयात् कायस्याणिमादिसिद्धिरिन्द्रियाणां दूरसूक्ष्मार्थग्राह्यत्वसिद्धिर्भवति ॥ ४३ ॥

स्वाध्यायादिष्टदेवतासंप्रयोगः ॥ ४४ ॥

इष्टमन्त्रादिजपात् स्वेष्टदेवतायाः सम्भाषणादि सिद्ध्यति ॥४४॥

समाधिसिद्धिरीश्वरप्रणिधानात् ॥ ४५ ॥

ईश्वरार्पितसर्वभावस्य भक्त्यैव योगसिद्धिर्भवति। न चैवं सति यमादिसप्ताङ्गवैयर्थ्यं स्यादिति वाच्यम्। अङ्गैर्भक्त्या वा योगसिद्धिरिति विकल्पाभ्युपगमात्। तदुक्तम्। "ईश्वरप्रणिधानाद्वा" इति। न वा भक्तिपक्षेऽङ्गवैफल्यं यमादीनां भक्तावप्यङ्गत्वसम्भवात्। तेषां भक्तियोगोभयार्थत्वं दध्न इन्द्रियक्रतूभयार्थत्ववदविरुद्धम्। न चाङ्गानामावश्यकत्वे तैरेव सिद्धेः किं भक्त्येति वाच्यम्। भक्तिहीनोपायैर्दूरे योगसिद्धिः भक्त्यमृतवर्षिभिरासन्नतमा योगसिद्धिरिति चिराचिरयोगरूपफलप्राप्तिसाधनत्वेन विकल्पोपपत्तेः। सा चेश्वरे भक्तिः प्रत्यगात्मयोगविषयभिन्नविषयेति वहिरङ्गत्ववाचोयुक्तिरित्यनवद्यम् ॥ ४५ ॥

एवं यमनियमान् सह सिद्धिभिर्निरूप्यासनस्वरूपमाह :—

स्थिरसुखमासनम् ॥ ४६ ॥

निश्चलं सुखावहं च यदासनं तद्योगाङ्गमित्यर्थः। आस्यतेऽनेनेत्यासनम्। तद् द्विविधं वाह्यं शारीरं च। तत्र चैलाजिनकुशोत्तरं वाह्यं, शारीरं, पद्मस्वस्तिकादीति विशेषः। तत्र पद्मासनं प्रसिद्धम्। सव्यमाकुञ्चितचरणं दक्षिणजङ्घोर्वन्तरे, दक्षिणं च सव्यजङ्घोर्वन्तरे निक्षिपेदिति स्वस्तिकासनम्। द्वे

पादतले द्वषणसमीपे सम्पुटीकृत्य सम्पुटोपरिपार्ष्णिसंपुटिकां न्यसेदिति भद्रासनं द्रष्टव्यम् ॥ ४६ ॥

सम्प्रत्यासनस्थैर्य्योपायमाह :—

प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ॥ ४७ ॥

स्वाभाविकः प्रयत्नश्चलत्वादासनविघातकः तस्योपरमेणासनं सिद्ध्यति । येन नाङ्गमेजयो भवति । अनन्ते नागनायके स्थिरतरफणासहस्रविधृतविश्वमण्डले चित्तस्य समापत्त्या देहाभिमानाभावेनासनदुःखास्फूर्त्तेरासनं सिद्ध्यति ॥ ४७ ॥

तत्सिद्धिलिङ्गमाह :—

ततो द्वन्द्वानभिघातः ॥ ४८ ॥

आसनजयात् शीतोष्णादिभिरताड़नं भवति ॥ ४८ ॥

सम्प्रत्यासनसाध्यं प्राणायाममाह :—

तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥ ४९ ॥

आसनस्थैर्य्ये सति वाह्यकोष्ठ्यवायोरन्तर्वहिर्गतिविच्छेदः प्राणायाम इत्यर्थः ॥ ४९ ॥

सामान्यलक्षणमुक्त्वा लक्ष्यं प्राणायामं विभजते :—

वाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो-दीर्घः सूक्ष्मः ॥ ५० ॥

प्राणायामश्चतुर्विधः । वाह्यवृत्तिरभ्यन्तरवृत्तिस्तम्भवृत्तिश्चतुरीयश्चेति । तत्र कोष्ठ्यस्य वायो रेचनेन वहिर्गतस्य वहिरेव धारणं वाह्यवृत्तिः स च रेचकः । वाह्यवायोः पूरणेनान्तर्गतस्यान्तर्धारणमभ्यन्तरवृत्तिः स च पूरकः । रेचनपूरण-

प्रयत्नं विना प्राणस्य केवलविधारकप्रयत्नेन गतिविच्छेदः स्तम्भवृत्तिः स च कुम्भकः। नायं रेचकः अन्तस्थत्वात्। नापि पूरकः तन्मिलातलनिहितजलविन्दुवच्छरीरे प्राणस्य सङ्कुचितत्वेन सूक्ष्मत्वात्। यो हि स्थूलोऽन्तर्निरुद्धो देहं पूरयति स पूरकः। तस्माद्रेचकपूरकाभ्यामेन विना सङ्कल्पप्रयत्नमात्रेण सूक्ष्मप्राणस्य कुम्भकशब्दितस्य घटजलवन्निश्चलत्वेन देहेऽवस्थानात् कुम्भकस्तृतीयः सिद्धः। त्रिविधोऽयं प्राणायामो देशकालसंख्याभिर्दीर्घः सूक्ष्म इति परिदृष्टः। तत्र रेचकस्य बाह्यो देशो विषयः प्रादेशवितस्तिहस्तादिपरिमितो निर्वाते नासाग्रे इषीकातूलादिक्रियाऽनुमितः। पूरकादेस्त्वान्तरो देश आपादतलमस्तकं पिपीलिकास्पर्शतुल्येन स्पर्शेनानुमितः। क्षणगणनया ज्ञेयः कालः। मात्रागणनया ज्ञेया संख्या। स्वजानुमण्डलं पाणिना त्रिःपरामृश्य क्षोटिकाऽवच्छिन्नः कालो मात्रा। सा हि स्वस्थस्य पुंसः श्वासप्रश्वासाभ्यां मिता भवति। तत्र षड्विंशतिमात्राभिरभ्यासक्रमेण दीर्घ इति दृश्यते। अधिकदेशकालव्यापित्वं प्राणनिरोधस्य दीर्घत्वम्। यथा यथा दीर्घ इति निपुणेन दृश्यते तथा तथा प्राणस्य सूक्ष्मत्वेन दर्शनाद्दीर्घ एव सूक्ष्म इति परिदृष्टो भवतीत्यर्थः॥ ५०॥

तुरीयं प्राणायामं दर्शयति :—

बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः॥ ५१॥

उक्तो बाह्यदेशविषयः, अभ्यन्तरविषयश्च हृदयनाभिचक्रादिः, तयोराक्षेपः सूक्ष्मदृष्ट्या पर्य्यालोचनं स यस्य पूर्वकालेऽस्ति स "चतुर्थः" स्तम्भवृत्तिः। तस्यापि दीर्घसूक्ष्मत्वं पूर्ववत्। न चास्य कुम्भकान्तर्भावः शङ्कनीयः। रेचकपूरकयोरभ्यासेन जितबाह्याभ्यन्तरविषयनिश्चयं विनैव सञ्जात्

प्रयत्नमात्रेण स्तम्भवृत्तिः कुम्भकः । तन्निश्चयपूर्वकः स्तम्भवृत्तिर्दुःप्रयत्नसाध्यस्तुरीय इति वैलक्षण्यादिति ॥ ५१ ॥

सम्प्रति चतुर्विधस्य प्राणायामस्य योगाङ्गत्वे द्वारभूतं फलमाह :—

ततः क्षीयते प्रकाशावरणम् ॥ ५२ ॥

प्राणायामाभ्यासात् प्रकाशशीलस्य बुद्धिसत्त्वस्य पिधानं क्लेशपापरूपं "क्षीयते" । तदुक्तं मनुना सर्वज्ञेन । "प्राणायामैर्दहेद्दोषान्" इति ॥ ५२ ॥

धारणासु च योग्यता मनसः ॥ ५३ ॥

किञ्च । प्राणायामादावरणक्षये सति मनसः सूक्ष्मलक्ष्य-"धारणासु" च "योग्यता" भवतीत्यर्थः ॥ ५३ ॥

उक्तयमादिभिः संस्कृतचित्तस्य प्रत्याहारो भवतीति मत्वा तं लक्षयति :—

स्वविषयासंप्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ॥ ५४ ॥

शुद्धचित्तस्य शब्दादिभिः स्वविषयैरसंप्रयोगे सति वैराग्यादिषयेभ्यो वियुज्य तत्त्वाभिमुखे सतीति यावत् "इन्द्रियाणां" चक्षुरादीनां यः "चित्तस्य" "स्वरूपानुकारः" स्वविषयासंप्रयोगेन तत्त्वाभिमुखरूपः स "प्रत्याहारः" । इन्द्रियाणि विषयेभ्यः प्रातिलोम्येनाक्रियन्तेऽस्मिन्निति व्युत्पत्तेः । इन्द्रियाणां विषयशूराणां चित्तवत्तत्त्वाभिमुख्यं नास्तीति द्योतनार्थः "इव" शब्दः । यथा मक्षिका मधुकरराजं चलन्तमनुचलन्ति स्थितमनुस्थिता भवन्ति तथा चित्तानुसारीण्येन्द्रियाणि चित्तनिरोधेनैव निरुध्यन्ते न यत्नान्तरेणेति तात्पर्य्यम् ॥ ५४ ॥

प्रत्याहारस्य योगद्वारभूतं फलमाह :—

ततः परमा वश्यतेन्द्रियाणाम् ॥ ५५ ॥

अनिषिद्धविषयसेवाविषये तत्त्वं विना स्वेच्छया भोगः, रागद्वेषाभावे सुखदुःखानुत्पादकं शब्दादिदर्शनमिन्द्रियाणां "वश्यता"। सा न परमा विषयाणांविषयोगात्। या तु विषयैः स्वामिमुखं नीयमानानामप्यिन्द्रियाबलानां तत्त्वपतिव्रतात्वेन विषयेष्वत्यन्तमप्रतिपत्तिः, रावणेन स्वाभिमुख्यं नीयमानाया अपि श्रीसीतायाः श्रीरामव्रतत्वेन राक्षसाधमाप्रतिपत्तिवत् सा परमेति जैगीषव्यः। प्रत्याहारात् "इन्द्रियाणां" "परमा" "वश्यता" भवतीत्यर्थः ॥ ५५ ॥

इति साधनपादः समाप्तः ॥ २ ॥

विभूतिपादः ।

एवं द्वितीयपादे क्लेशतनूकरणद्वारा योगसाधनं क्रियायोगं निरूप्य, सप्रपञ्चं क्लेशकर्मविपाकान् उक्त्वा, तेषां हेयत्वार्थं दुःखत्वं दर्शयित्वा, हेयतद्धेतुमोक्षतद्धेतूनुपन्यस्य, योगस्य बहिरङ्गं यमादिपञ्चकं सावान्तरफलं निरूपितम् सम्प्रति धारणाऽऽदित्रितयमन्तरङ्गं संयमसंज्ञं वदन् संयमसाध्या विभूतयः अन्नाहार कैवल्यफलकयोगप्रवृत्तिहेतवो वक्तव्या इति पादान्तरमारभमाणे धारणां लक्षयति :—

देशबन्धश्चित्तस्य धारणा ॥ १ ॥

नाभिचक्रहृदयनासाऽग्रादौ देशे संप्रज्ञातयोगसिद्धये चित्तस्य यो बन्धः स्थिरीकरणं सा "धारणा" इत्यर्थः। तदुक्तं विष्णुपुराणे :—

"प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम्।
वशीकृत्य ततः कुर्य्याच्चित्तस्थानं शुभाश्रये॥
मूर्त्तं भगवतो रूपं सर्वोपाश्रयनिस्पृहम्।
एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्य्यते॥
तच्च मूर्त्तं हरे रूपं यादृक् चिन्त्यं नराधिप।
तच्छून्यतामनाधारे धारणा नोपपद्यते॥
प्रसन्नवदनं चारुपद्मपत्रनिभेक्षणम्।
सुकपोलं सुविस्तीर्णललाटफलकोज्ज्वलम्॥
समकर्णान्तविन्यस्तचारुकुण्डलभूषणम्।
कम्बुग्रीवं सुविस्तीर्णश्रीवत्साङ्कितवक्षसम्॥
वलीविभङ्गिना मग्ननाभिना चोदरेण वै।
प्रलम्बाष्टभुजं विष्णुमथ वाऽपि चतुर्भुजम्॥
समस्थितोरुजङ्घञ्च सुस्थिरांघ्रिकराम्बुजम्।
चिन्तयेद्ब्रह्मभूतं तं पीतनिर्मलवाससम्" इति॥

धारणासाध्यं ध्यानं लक्षयति :—

तत्र प्रत्ययैकतानता ध्यानम् ॥ २ ॥

यत्र धारणा विजातीयवृत्तिपरिहारे यत्नापेक्षा भवति "तत्र" एव या प्रत्ययानां वृत्तीनामेकतानता यत्नमनपेक्ष्यैकविषयता तत् "ध्यानम्" इत्यर्थः।

तद्रूपप्रत्ययैकाग्रसन्ततिश्चान्यनिस्पृहा।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप॥
इति तत्रैवोक्तं खाण्डिक्यजनकं प्रति केशिध्वजेन॥ २॥

समाधिं लक्षयति :—

तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः॥३॥

अतिस्वच्छचित्तवृत्तिप्रवाहरूपं ध्यानमेवार्थमात्रस्वरूपेण

निर्भासमानं "समाधिः" । "मात्रच:" अर्थमाह । "स्वरूपशून्य-मिव" इति । ध्यानस्वरूपज्ञानशून्यम् । इवशब्देन ध्यानस्य सत्तां द्योतयति । यथा स्वच्छस्फटिकमणिः कुसुमरूपेणैव निर्भासते न स्वरूपेण तद्वदित्यर्थः । विजातीयवृत्तिविच्छिन्ना धारणा । अविच्छिन्नं ध्यानम् । ध्येयध्यानध्यातृस्फूर्त्तिमध्ये ध्येयमात्रस्फूर्त्तिमान् समाधिः । स एव दीर्घकालव्यापी सन् संप्रज्ञाताख्यो योग इत्युच्यते । ध्येयस्फूर्तिशून्योऽसंप्रज्ञात इति भेदः ॥ ३ ॥

धारणाध्यानसमाधित्रयस्य व्यवहारलाघवफलां संयमसंज्ञामाह :—

त्रयमेकत्र संयमः ॥ ४ ॥

एकविषयं "त्रयं" "संयम" संज्ञं भवतीत्यर्थः ॥ ४ ॥

संयमस्य फलमाह :—

तज्जयात्प्रज्ञाऽऽलोकः ॥ ५ ॥

तस्य संयमस्य जयात् स्थैर्य्यात् प्रज्ञायाः समाधिजाया आलोको नैर्मल्यं भवति । भ्रान्तिसंशयादिमलशून्या ध्येयतत्त्वस्फूर्तिर्भवतीत्यर्थः ॥ ५ ॥

क्व पुनर्नियुक्तस्य संयमस्येदं फलमिति प्रश्नस्योत्तरं पठति :—

तस्य भूमिषु विनियोगः ॥ ६ ॥

स्थूलसूक्ष्मादिषूक्ताः सवितर्का-निर्वितर्का-सविचारा-निर्विचारा-ऽऽदयो भूमयः । तासु संयमस्य "विनियोगः" । संयमेन पूर्वभूमिं जित्वा तदुत्तरां भूमिं जिगीषेत् । न हि स्थूलमसाक्षात्कृत्य सूक्ष्मं साक्षात्कर्तुं शक्यमिति भावः ॥ ६ ॥

ननु योगाङ्गानां मध्येऽङ्गपञ्चकं पूर्वपादे निरूपितं त्रयमत्र निरूपितं तत्र को हेतुरित्यत्राह :—

त्रयमन्तरङ्गं पूर्वेभ्यः ॥ ७ ॥

पञ्च यमादीनि संप्रज्ञातसमाधेः प्रतिबन्धकस्य चित्तकाय-प्राणेन्द्रियमलस्य निवृत्तिद्वारा बहिरङ्गानि। धारणाऽऽदित्रयं त्वङ्गिनः समानविषयतया साक्षात्स्वरूपोपकारकत्वात् "अन्तरङ्गम्"। अतः "पूर्वेभ्यः" पञ्चभ्य इदमन्तरङ्गमिति ज्ञात्वा तत्तद्भूमिविनियोगोक्त्यर्थमत्र निरूपितमित्यर्थः ॥ ७ ॥

तदपि बहिरङ्गं निर्बीजस्य ॥ ८ ॥

असंप्रज्ञातस्य धारणाऽऽदित्रयमपि "बहिरङ्गम्"। अङ्गिनो निर्विषयत्वेन त्रयस्य सविषयत्वेन समानविषयत्वाभावात्। अतो व्युत्थानरूपस्य त्रयस्य संप्रज्ञातपरिपाकप्रज्ञाप्रसादरूपपरवैराग्यद्वारा निरोधे सति संप्रज्ञातस्यापि निरोधाद्विर्बीजो भवति। पारम्पर्येणोपकारकत्वाद्बहिरङ्गमित्यर्थः ॥ ८ ॥

सम्प्रति संयमाद्विभूतीर्वक्तुकामः संयमस्य लक्षणान् परिणामान् दर्शयति :—

व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः ॥ ९ ॥

व्युत्थानं संप्रज्ञातः। स निरुध्यते येन तत्परवैराग्यं निरोधः। तत्र यदा व्युत्थानसंस्कारस्याभिभवो निरोधसंस्कारस्य प्रादुर्भावश्च भवतस्तदा निरोधसंस्कारस्यासंप्रज्ञातस्य क्षणेनावसरेण युक्तं चित्तं भवति। तस्य निरोधक्षणस्य चित्तस्य धर्मिणस्त्रिगुणत्वेन चलस्य सदा परिणामशीलस्याभिभूतप्रादुर्भूतयोः संस्कारयोर्धर्मित्वेन योऽन्वयः स निरोधाख्यः परिणाम इत्यर्थः। परवैराग्यरूपवृत्त्या संप्रज्ञातवृत्तेस्तत्संस्कारस्य चाभिभवे सति परवैराग्यसंस्कार एवाभिव्यक्तः सन्निर्बीजः "निरोधपरिणामः" इति भावः ॥ ९ ॥

सर्वात्मना व्युत्थानसंस्काराभिभवे सति निरोधस्थैर्यमाह :—

तस्य प्रशान्तवाहिता संस्कारात् ॥ १० ॥

निरोधसंस्कारप्रचयाविरतसमस्तव्युत्थानसंस्कारमलस्य चित्तस्य निरोधसंस्कारपरम्परामात्रवाहिता भवति। ननु तर्हि चलमेव तदाऽपि चित्तं सत्यं तदाऽपि तादृशी परिणाममात्रा स्थैर्यमित्युच्यत इति भावः ॥ १० ॥

एवं निर्बीजावस्थामुक्त्वा संप्रज्ञातपरिणाममाह :—

सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि-परिणामः ॥ ११ ॥

"चित्तस्य" सर्वार्थता नानाऽर्थाकारत्वं विक्षिप्तत्वरूपो धर्मः। एकाग्रता वक्ष्यमाणो धर्मः। तयोर्यथाक्रमं "क्षयोदयौ" तिरोभावप्रादुर्भावौ, न सतो विनाशो नासत उत्पत्तिस्तौ "समाधि-परिणामः" इत्यर्थः। अभ्यासेन विक्षेपात्यये सत्येकाग्रकता स्थैर्यं समाधिरिति भावः ॥ ११ ॥

शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता-परिणामः ॥ १२ ॥

शान्तोऽतीतः, उदितो वर्तमानः, तौ। एकविषयत्वेन तुल्यौ च तौ प्रत्ययौ च "तुल्यप्रत्ययौ"। "चित्तस्य" नैरन्तर्येण वृत्तिरियमेकविषयमेकाग्रताऽऽख्यः परिणाम इत्यर्थः। इयमेकाग्रता द्वादशगुणा, धारणा भवति। द्वादशगुणा धारणा, ध्यानम्। द्वादशगुणं ध्यानं, समाधिः। द्वादशगुणः समाधिः, संप्रज्ञाताख्यो योग इति भेदः ॥ १२ ॥

मनःपरिणामेषु निरोधसमाध्येकाग्रतासूक्तन्यायमन्यत्रातिदिशति :—

एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ॥ १३ ॥

भूतेषु पृथिव्यादिषु धर्मिषु चक्षुरादीन्द्रियेषु च परिणामस्त्रिविधः, धर्मपरिणामो, लक्षणपरिणामो-ऽवस्थापरिणामश्चेति। "एतेन" मनःपरिणामव्याख्यानेन "व्याख्याता" भवन्ति। तथा हि मृदः पिण्डरूपधर्माभिभवे सति घटरूपो धर्मः प्रादुर्भवति यथा। तथा चित्तस्य व्युत्थानात्यये निरोधोद्भवः सोऽयं धर्मपरिणामः। लक्षयति कार्य्यरूपं धर्मं व्यावर्त्तयतीति लक्षणं कालत्रयम् अनागतोऽध्वा, वर्त्तमानोऽध्वा, अतीतोऽध्वेति कालत्रयमेवाध्वत्रयमित्युच्यते। तत्र तद्धर्मस्य घटस्यानागतत्वं प्रथमोऽध्वा, वर्तमानत्वं द्वितीयोऽध्वा, अतीतत्वं तृतीयोऽध्वा, सोऽयं लक्षणपरिणामः। अनागतत्वं हि धर्मो वर्त्तमानातीतधर्माभ्यां व्यावर्त्तयति। एवं वर्त्तमानत्वादिकमपि लक्षणं मन्तव्यम्। एवं लक्षणपरिणामस्य तदवच्छिन्नस्य धर्मस्य वाऽवस्थापरिणामो द्रष्टव्यः। म यथा आगामिकल्पभावी अनागततमः, एतत्कल्पभाव्यनागततरः, श्वोभावी अनागतः, सद्यो जातो वर्त्तमानतमः, इत्याद्यूह्यम्। तथा वर्त्तमानस्य नवत्वपुराणत्वादयोऽवस्थापरिणामाः। एवं "प्रतिक्षणपरिणामिनः सर्वे भावा ऋते चितिशक्तेः" इति संक्षेपः ॥ १३ ॥

यस्यायं त्रिविधः परिणामः तं धर्मिणं दर्शयति :—

शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ॥ १४ ॥

शान्ताः क्षतव्यापारा अतीताः। उदिता जलाहरणादिव्यापाराविष्टा वर्त्तमानाः। अव्यपदेश्याः शक्तिरूपेण मृदादिषु धर्मिषु स्थिता अनागताः। ते हि सूक्ष्मतया धर्मिणो धर्मान्तराद्वा भेदेन

व्यपदेशेन व्यपदेष्टुं न शक्यन्त अत एव सर्वकार्यं शक्तिरूपेणा-व्यपदेश्यं कारणमात्रसम्भावितमिति सर्वं कारणं सर्वकार्य्यात्मकं भवति। दृश्यते हि दावदग्धवेत्रबीजात् कदलीखण्डोद्भवः। न हि तत्रासत उद्भवः सम्भवति अभिव्यञ्जकानां देशकालकर्मादीनां वैचित्र्यात् क्वचित् किञ्चित्देवोद्भवतीति लोके कार्य्यकारण-व्यवस्था। योगसिद्धानां देशादिप्रतिबन्धाभावात् सर्वस्मात् सर्व मुद्भवति तानितान् शान्तोदिताव्यपदेश्यान् घटीयन्त्रवदनिशमा वर्त्तमानान्यो-ऽनुपतत्यन्वेति सोऽनुपाती "धर्मी"। यथा मृत् सुवर्णादिश्चूर्णपिण्डघटरुचकाद्यन्वयी धर्मीत्युच्यते ॥ १४ ॥

नन्वेकस्य धर्मिणः परिणामबहुत्वे को हेतुरित्यत आह :—

क्रमान्यत्वं परिणामान्यत्वे हेतुः ॥ १५ ॥

मृदि चूर्णपिण्डयोः पिण्डघटयोर्वटकपालयोः पौर्वापर्य्यरूप-क्रमस्यान्यत्वं दृश्यमानमेकस्या एव मृदः परिणामानां चूर्णादीनां धर्माणामन्यत्वे "हेतुः" ज्ञापकः। एवमनागतवर्त्तमानातीताध्वनां क्रमाल्लक्षणपरिणामान्यत्वे धर्माणां ज्ञेयम्। तथा क्षणपरम्पर्य घटव्रीह्यादीनां दुर्लक्ष्यसूक्ष्मपरिणामक्रमेण नवत्वपुराणत्वाद्य-वस्थापरिणामान्यत्वे बोध्यम्। दृश्यते हि कुसूलरक्षितव्रीहीणां कालेन पाणिस्पर्शमात्रेण चूर्णावस्था। न ह्येषां क्षणिकपरिणाम-क्रमं विना नवानां वा दृष्टा। नाप्यकस्माद्भवति। तस्माद्धर्मिणः परिणामिनित्यस्य धर्मा भिन्नाः, धर्माणां लक्षणानि, तेषामवस्था, इति स्थितम्। धर्म्यनन्यत्वान्न क्षणिकत्ववाद इत्यनवद्यम्। तत्र केचित् परिणामाश्चित्तस्य प्रत्यक्षाः कामसुखादयः। केचित्तु आगमानुमानगम्याः सन्ति। तदुक्तं "भाष्ये" :—

"निरोधकर्मसंस्काराः परिणामोऽथ जीवनम्।
चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिताः॥" इति।

परोक्षा इत्यर्थः। कर्म पुण्यापुण्यापूर्वम्। त्रिगुणत्वात् चित्तस्य प्रतिक्षणपरिणामोऽनुमेयः। जीवनं श्वासादिलिङ्गगम्यं प्राणधारणम्। चेष्टा क्रिया चित्तस्था गात्रचेष्टागम्या। कार्याणां सूक्ष्मावस्था शक्तिः ॥ १५ ॥

एवं संयमधर्मस्य विषया धर्मादयो निरूपिताः। सम्प्रत्या-पादसमाप्तेः संयमस्य तत्तद्विषये वशीकारज्ञानाय विभूतय उच्यन्ते :—

परिणामत्रयसंयमादतीतानागतज्ञानम् ॥ १६ ॥

चित्तसत्त्वं हि स्वतः सर्वप्रकाशस्वभावं रजश्चमोमलप्रति-बन्धस्य संयमेन निवृत्तौ सत्यां प्रमाणमनपेक्ष्य सर्वं जानातीति स्थितिः। तत्रास्मिन् धर्मिण्येते धर्मा अनागतादयः, एतेऽध्वानः, एता अवस्था, इति धर्मलक्षणावस्थारूप-"परिणामत्रयसंयमात्" योगिनोऽतीतानागतवस्तुसाक्षात्कारो भवतीत्यर्थः ॥ १६ ॥

शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्कर-स्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानम् ॥ १७ ॥

वर्णातिरिक्तो वर्णैर्व्यङ्ग्यो नित्यो निर्भागः शब्दः स्फोटः। स द्विविधः। गौरित्येकं पदमिति श्रोत्रग्राह्यः पदस्फोटः, गामा-नयेत्येकं वाक्यमिति ग्राह्यो वाक्यस्फोटः। न च क्षणिकानेक-वर्णेष्वेकत्वप्रत्यक्षबुद्धिः। तथा हि। गौरिति त्रयो वर्णा गवशौरि-पयःपदेषु विद्यमानैर्गकारौकारविसर्जनीयैर्विजातीयस्फोटव्यञ्जकैः सदृशा भवन्ति तुल्यस्थानत्वात्। तदुक्तम् :—

"अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु च ॥" इति।

एवं स्पर्शानां स्पृष्टप्रयत्नः, स्वराणामूष्मणाञ्च विवृत मित्यादिप्रयत्नसादृश्यं द्रष्टव्यम्। तथा च प्रयत्नविशेषनुन्नस्योदानवायोरष्टस्थानैः संयोगे सत्यष्टस्थानस्थेन वागिन्द्रियेणोत्पद्यमाना गकारादयो वर्णा ध्वन्यभेदेन श्रोत्रप्रत्यक्षानुभववेद्याः प्रत्येकं गोपदस्फोटं व्यञ्जयन्तो गणादिस्फोटैः सदृशमव्यक्तं व्यञ्जयन्ति स्वनिष्ठसादृश्यानां स्वव्यङ्ग्ये समारोपात्। पुनर्गकारादयस्त्रयः क्रमवन्तः स्वानुभवजनितसंस्कारसहितश्रोत्रलब्धजन्मन्येकस्यां बुद्धौ भासमानत्वेन मिलिताः स्वस्फोटान्तराद्यावृत्तं व्यक्त्यन्तरं गोपदस्फोटं निर्भागमपि स्वतादात्म्येनारोपितसादृश्यात्मकभागवन्तमक्रमं नित्यमपि सक्रममनित्यमिव व्यञ्जयन्ति। मलिनवक्त्रादर्शो निर्मलमृजु मुखं स्वसादृश्यमारोप्य मलिनं वक्त्रमिव यथा व्यञ्जयति तद्वत्। एवं वर्णैरभिव्यक्तः स्फोटोऽर्थबोधकः। न च वर्णैरर्थस्यैव प्रत्येकमव्यक्ता, मेलनेन व्यक्ततरा, अभिव्यक्तिरस्तु किं स्फोटेनेति वाच्यम्। व्यक्ताव्यक्तत्वस्य प्रत्यक्षज्ञानधर्मस्य परोक्षार्थज्ञानस्थत्वायोगाद्। एकं पदमेकं वाक्यमिति स्फोटज्ञानं श्रोत्रजप्रत्यक्षमिति तस्यैव व्यक्ताव्यक्तेत्यलं विस्तरेण। अस्य शब्दस्य शब्दप्रत्ययाभ्यामभेदेन विकल्पिते सङ्कीर्णेऽर्थे सङ्केतग्रहो लोकस्येति पूर्वं प्रतिपादितम्। तथा गौरिति शब्दो, गौरित्यर्थो, गौरिति प्रत्ययः, इत्याबालपण्डितं शब्दार्थप्रत्ययानामितरेतराभेदाध्यासात् सङ्करः प्रसिद्धः। तेषां शास्त्रयुक्तिभ्यां यः प्रविभागः प्रसिद्धः, वर्णव्यङ्ग्यं पदं पदव्यङ्ग्यं वाक्यं शक्त्याद्यित्वा बोधकमिति शब्दतत्त्वम्, अर्थो द्रव्यगुणकर्मजात्यादिभिर्वाच्यो लक्ष्यश्चेत्यर्थतत्त्वं, शब्दजन्योऽर्थविषयो बुद्धिस्थप्रत्यय इति ज्ञानतत्त्वमिति गोशब्दवत् सर्वत्र विभागो ज्ञेयः तस्मिन् विभागे संयमात् सर्वशब्दादिवशीकारसूचकं सर्वभूतानां पशुपक्षयादीनां रुतज्ञानं भवति। इममर्थमेते वदन्तीति संयमी जानातीत्यर्थः ॥१७॥

संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥ १८ ॥

अनुभवक्लेशजाः स्मृतिक्लेशहेतवः, कर्मजाः सुखदुःखहेतवः, इतीमे संस्काराः सन्ति चित्तस्य धर्माः पूर्वजन्मपरम्परासम्बिता-स्तेषु श्रुतेष्वनुमितेषु च संयमेन साक्षात्कृतेषु तद्धेतुत्वेन स्वीय-परकीयपूर्वजन्मपरम्पराया: साक्षात्कारो भवतीत्यर्थः। अत्र भग-वान् जैगीषव्य उदाहरणम्। तस्य किल योगवर्यस्य प्रकृतिवशिनः संस्कारसाक्षात्कारात् दशसु महाकल्पेषु देवतिर्यङ्नरादियोनिषु जन्मपरम्परां साक्षात्कृतवतो दिव्यविवेकख्यातिश्च प्रादुरभवत्। तं भगवान् भावव्यः पप्रच्छ। भगवन्! त्वया दृष्टेषु दशकल्पेषु सुख-दुःखयोः किमधिकमनुभूतम्। जैगीषव्य आह। हन्त भो आयुष्मन्! देवनरादिषु पुनःपुनरुत्पद्यमानेन यत्किञ्चिदनुभूतं मया तत्सर्वं दुःखमेवेति। भावव्य आह। किं प्रकृतिवशित्वमपि दुःखमेव येन दिव्या भोगा अक्षयाः सङ्कल्पमात्रेणोपतिष्ठन्त इति। स उवाच। सत्यं, लौकिकसुखापेक्षया प्रधानवशित्वमनुत्तमं, परं कैवल्या-पेक्षया दुःखमेव यतस्तृष्णातन्तुरनुच्छिन्नः सर्वदुःखाकरः, तद्वि-च्छेदात् कैवल्यसुखं प्रसन्नमनुत्तममिति भाष्यस्याऽऽख्यायिका। ननु यत्र संयमस्तस्य साक्षात्कार इति नियमात् कथं संस्कार-संयमात् पूर्वजन्मज्ञानमिति चेत्? सत्यं, सानुबन्धसंस्कारसंयमा-दनुबन्धत्वेन पूर्वजन्मनो ज्ञानमुपपन्नमिति मन्तव्यम् ॥ १८ ॥

सिद्धान्तरमाह :—

प्रत्ययस्य परचित्तज्ञानम् ॥ १९ ॥

परचित्तस्य संयमात् तत्साक्षात्कारो भवतीत्यर्थः ॥ १९ ॥

न च तत् सालम्बनं तस्याविषयीभूतत्वात् ॥ २० ॥

किं संस्कारसाक्षात्कारात्तदनुबन्धज्ञानवत्परचित्तसाक्षात्कारा-

त्तदालम्बनं ज्ञानं भवति। "न" इत्याह, परचित्तमात्रं साक्षात्क्रि
यते। "च" स्वर्थः। "सालम्बनं" सविषयं तु न साक्षात्क्रियते
तस्य सालम्बनस्याज्ञातत्वात्। लिङ्गादिना ज्ञाते हि संयम
प्रवृत्तिर्नाज्ञाते। तथा च यथा संस्काराणां संस्कारत्वलिङ्गेन,

"जन्मान्तरे यदभ्यस्तं तदद्याप्युपपद्यते।
हिंस्राहिंस्रे मृदुक्रूरे तस्मात्तत्तस्य रोचते॥"

इत्याद्यागमेन, च जन्मान्तरानुबन्धित्वं ज्ञातुं शक्यं तथा पर
चित्तममुकविषयमिति ज्ञातुमशक्यं लिङ्गाद्यभावात्। चित्तमा
तु परस्य हर्षादिलिङ्गेन सुज्ञानम्। यदि परचित्तं ज्ञात्वा संयमे
साक्षात्कृतास्येदानीं किमालम्बनमिति स्वचित्तं प्रणिधत्ते तद
तत्कालीनमालम्बनं जानाति। रागादिवृत्तयस्तु चित्ताभेदा
त्साक्षात्क्रियन्त इति विशेषः॥ २०॥

सिद्ध्यन्तरमाह :—

**कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुः-
प्रकाशासंप्रयोगेऽन्तर्द्धानम्॥ २१॥**

कायस्य यद्रूपं चाक्षुषत्वप्रयोजकमस्ति तस्मिन् संयमात्तस्य
रूपस्य परचक्षुर्ग्राह्यत्वानुकूलायाः शक्तेः स्तम्भे प्रतिबन्धे सति
परचाक्षुषज्ञानाविषयत्वे जातेऽन्तर्द्धानं योगिदेहस्याचाक्षुषत्वं
यथाकामं सिध्यतीत्यर्थः। एतेन स्वीयशब्दस्पर्शरसगन्धानां
संयमाच्छ्रोत्राद्यग्राह्यत्वसिद्धिरुक्ता भवति॥ २१॥

विभूत्यन्तरमाह :—

**सोपक्रमं निरुपक्रमं च कर्म तत्संयमादप
रान्तज्ञानमरिष्टेभ्यो वा॥ २२॥**

पूर्वजन्मकृतमिदानीं स्थितं "कर्म" द्विविधम्। "सोपक्रमं," नेरुपक्रमं," "च" फलदानव्यापारयुक्तं शीघ्रविपाकञ्च सोपं। सातपदेशे प्रसारितेनार्द्रवस्त्रेण शीघ्रं शुष्यता तुल्यं, लान्तरे फलप्रदमिदानीं निर्व्यापारं चिरविपाकं निरुपक्रमं, रातपदेशे पिण्डीकृतार्द्रवस्त्रतुल्यम्। तत्र संयमेऽस्य साक्षारात्तद्विपाकस्यायुषोऽवसानं "अपरान्त" शब्दितं ज्ञायते। परस्य ाजापतेरन्तो महाप्रलयः। नरादीनां मरणमपरान्तः। तस्य ज्ञानममुष्मिन् देशेऽमुककाले मम देहवियोग इति साक्षात्कारः। त्र सोपक्रमकर्मसाक्षात्कारे तद्विपाकस्य झटिति भोगार्थं बहुरीराणि गृहीत्वा योगी स्वेच्छया म्रियते। एकेन तत्र ोगे मरणविलम्बः। प्रसङ्गादाह। "अरिष्टेभ्यो वा" इति। त्राध्यात्मिकारिष्टानि करपिहितकर्णपुटस्य प्राणघोषाश्रवणानि, आधिभौतिकानि यमभटदर्शनादीनि, आधिदैविकान्यकमात् स्वर्गदर्शनादीनि, एतान्यरिवत् त्रासयन्ति अरिष्टानि त्रिविधानि मरणलिङ्गानि तेभ्यो वा मरणज्ञानं भवत्यगिनोऽपीत्यर्थः॥ २२॥

मैत्र्यादिषु बलानि॥ २३॥

पूर्वं मैत्रीकरुणामुदितासु संयमो विहितस्तेन तासां "बलानि" र्य्याणि भवन्ति। यैर्योगी प्राणिमात्रस्य सुखकरः सुहृद्भवति, खादुद्वर्ता भवति, अपक्षपाती भवति। उपेक्षा त्वौदासीन्यमात्रं तस्य बलं किञ्चिदस्ति संयमभावादित्यर्थः॥ २३॥

बलेषु हस्तिबलादीनि॥ २४॥

हस्तिहनुमन्नरुडादि "बलेषु" तद्भावने संयमात्तानि बलानि गिनः प्रादुर्भवन्ति। चित्तस्य खतः सर्वसामर्थ्यादित्यर्थः॥२४॥

प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्ट-ज्ञानम् ॥ २५ ॥

ज्योतिष्मती प्रवृत्तिः प्रागुक्ता । तस्याः ज्योतिःसाक्षात्कार-रूपप्रवृत्तेर्य आलोक आस्पदं सर्वतो विप्रसृतं निर्मलबुद्धिसत्त्वं, तस्य सूक्ष्मे परमाण्वादौ, भूतव्यवहिते निध्यादौ, विप्रकृष्टे मेर्वन्तरवर्त्तिरसायनादौ, "न्यासात्" प्रक्षेपात्तेषां ज्ञानं साक्षात्कारो भवति । सौरालोकसंयोगाद् घटादिज्ञानवदितरार्थः ॥ २५ ॥

एवं संयमेन साक्षात्कृतबुद्ध्यालोकद्वारा ज्ञानमुक्त्वा भौतिके तद्द्वारा तदाह :—

भुवनज्ञानं सूर्य्ये संयमात् ॥ २६ ॥

दिवि देदीप्यमानमार्तण्डमण्डले सुषुम्नाऽऽदिद्वारके सहस्र-रश्मिमालिनि "संयमाद्" दृश्याभिन्नं चित्तं चतुर्दशभुवनानि साक्षात्करोतीत्यर्थः ॥ २६ ॥

चन्द्रे ताराव्यूहज्ञानम् ॥ २७ ॥

"चन्द्रे" संयमान्नक्षत्राणां सन्निवेशविशेषं साक्षात्करोति। सूर्यस्य नक्षत्राभिभावकत्वात् तत्संयमात् तज्ज्ञानं न भवतीति भावः ॥ २७ ॥

ध्रुवे तद्गतिज्ञानम् ॥ २८ ॥

"ध्रुवे" संयमात् तासां ताराणां गतिं जानाति। दृश्यं तारा-ऽनेन ग्रहेण सहानेन पथा एतावन्तं कालं गच्छतीति ॥ २८ ॥

एवं बाह्यसिद्धीरुक्त्वाऽऽध्यात्मिकसिद्धीराह :—

नाभिचक्रे कायव्यूहज्ञानम् ॥ २९ ॥

कायस्य मध्यभागे यन्नाभिचक्रमाधारलिङ्गचक्राभ्यां चतुःष-

पत्राभ्यामुपरिस्थितं दृग्पत्रम्। तस्मिन् संयमाद्देहस्य सन्निवेशं जानाति। वातपित्तश्लेष्माणस्त्रयो दोषाः। त्वगुधिरमांसस्नायुस्थिमज्जाशुक्राणि सप्त धातवः। तेषां पूर्वं पूर्वं बाह्यमित्येष कायविन्यासः ॥ २८ ॥

कण्ठकूपे क्षुत्पिपासानिवृत्तिः ॥ ३० ॥

जिह्वातन्तोरधस्तात् कण्ठस्य कूपाकारः प्रदेशोऽस्ति। यत्र प्राणादेः संघर्षात् क्षुत्पिपासे भवतः। तत्र संयमात् तन्निवृत्तिरित्यर्थः ॥ ३० ॥

कूर्मनाड्यां स्थैर्य्यम् ॥ ३१ ॥

कूपादध उरसि कूर्माकारा नाड्यस्ति। तत्र संयमात् तत्प्रविष्टस्य चित्तस्य "स्थैर्य्यं" सिद्धतीत्यर्थः ॥ ३१ ॥

मूर्द्धज्योतिषि सिद्धदर्शनम् ॥ ३२ ॥

शिरःकपाले यच्छिद्रं ब्रह्मरन्ध्राख्यं सुषुम्नायोगात् हृदयस्थचित्तमणिप्रभायोगाच्च भास्वरं मूर्द्धज्योतिः। तत्र संयमात् सिद्धानदृश्यानपि पश्यतीत्यर्थः ॥ ३२ ॥

प्रातिभाद्वा सर्वम् ॥ ३३ ॥

विवेकख्यातिर्हि प्रसंख्यानं संसारतारकं तदर्थं संयमे क्रियमाणे प्रसंख्यानोपसूचकं प्रतिभया ऊहमात्रेण जातं प्रातिभं ज्ञानं भवति। तेन "वा" योगी "सर्वं" जानाति। यथा सूर्य्योदये सूचकारुणप्रभया लोकः पश्यति तद्वत्। राजवार्त्तिके तु सर्वनिमित्तानपेक्षमनोमात्रजन्यं यथार्थं झटित्युत्पद्यमानं ज्ञानं प्रतिभा। तस्याः संयमात् प्रातिभं विवेकख्यातेः पूर्वभावि तारकमुदेति। तेन सर्वं योगी जानातीति व्याख्यातम् ॥ ३३ ॥

हृदये चित्तसंवित् ॥३४॥

अधोमुखे हृत्पद्मे चित्तस्य स्थाने संयमात् सवासनस्य चित्तस्य संविद्भवतीत्यर्थः॥ ३४॥

सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोगः परार्थ्यात् स्वार्थसंयमात् पुरुषज्ञानम् ॥ ३५॥

बुद्ध्यात्मनोर्भोग्यभोक्तृत्वेनात्यन्तभिन्नयोर्यः "प्रत्ययाविशेषो" बुद्धिपरिणामः सुखदुःखमोहप्रत्ययः पुरुषस्य प्रतिविम्बग्राहिभिरविशेषः सारूप्यं प्रतिविम्बद्वारा सुखाद्यारोपः स "भोगः" बुद्धिस्थो दृश्यत्वात् परार्थः पुरुषस्य भोक्तुः शेषभूतस्तस्मात् परार्थाद् भोगाच्चित्प्रतिविम्बोपसर्जनक-प्रत्ययरूपाज्जडादन्यश्चित्-स्वभावः प्रतिविम्बः स्वार्थो नान्यशेषः। तत्र संयमात् पुरुषस्य साक्षात्कारो भवति। सोऽपि स्वप्रकाशेन पुरुषेण दृश्यो बुद्धिस्थो न पुरुषं विषयीकर्त्तुमीष्टे। किन्तु अनात्माकारत्व-शून्यत्वेनात्ममात्रप्रतिविम्बग्राहित्वात् पुरुषज्ञानमित्युच्यते। तथा च स्मृतिः :—"विज्ञातारमरे केन विजानीयात्" इति॥ ३५॥

सम्प्रति अस्य संयमस्य पुरुषसाक्षात्कारात् प्राग्भवाः सिद्धी-र्दर्शयति :—

ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते ॥ ३६॥

"ततः" स्वार्थसंयमात् प्रातिभं पूर्वोक्तं सर्वगोचरं ज्ञानं मनोमात्रेण योगजशुक्लधर्मानुग्रहीतेन जायते। दिव्यानां शब्दस्पर्शरूपरसगन्धानां ग्राहकाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि क्रमेण "श्रावणवेदनादर्शास्वादवार्त्ता" संज्ञानि "जायन्ते"

दिव्यशब्दग्राहकं श्रोत्रं यदा योगिनो भवति, तदा तस्य श्रोत्रस्य श्रावणमिति तान्त्रिकी संज्ञा भवति तथा घ्राणस्य वार्त्ता, संज्ञेत्याद्यूहनीयम् ॥ ३६ ॥

ननु तर्हि अयं योगी कृतकृत्य इत्यत आह :—

ते समाधावुपसर्गा व्युत्थाने सिद्धयः ॥ ३७ ॥

"ते" प्रातिभाऽऽदयः "समाधौ" निःश्रेयसफले रतस्य "उपसर्गा" विघ्ना भवन्ति। अतो मुक्त्यर्थी तानुपेक्षते। न ह्यात्मसम्बोधनं विना सिद्धिकोट्याऽपि कृतकृत्यता भवति। तदुक्तं परमगुरुणा श्रीकृष्णेन :—

"एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत !" इति।

"व्युत्थाने" रतस्य तु ताः "सिद्धयो"-भवन्तीत्यर्थः ॥ ३७ ॥

तदेवं संयमस्य ज्ञानरूपां विभूतिमात्मदर्शनां तामुक्त्वा क्रियारूपामाह :—

बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः ॥ ३८ ॥

सर्वत्र व्याप्तिशीलस्य चित्तस्य स्वशरीरमात्रे सङ्कोचेन स्थितिर्बन्धः तस्य कारणं धर्माधर्मौ तयोः संयमेन शैथिल्यं भवति। प्रचरत्यनेन चित्तमिति प्रचारो नाड़ीसङ्घः, तस्यापि संयमेन संवेदनमधुनाऽनया नाड्या सञ्चरतीति ज्ञानं भवति, तथा प्राणेन्द्रियमार्गनाड़ीज्ञानं भवति। तथा च बन्धकरज्जु-नाशे मार्गज्ञस्य स्वप्रवेशमप्रवेशवत् "चित्तस्य" परकाये मृते जीवति वा प्रवेशो भवति चित्तमन्विन्द्रियाणि विशन्ति मधुकरराजमिव मक्षिका इत्यर्थः ॥ ३८ ॥

उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ॥ ३९ ॥

त्रयो खल्विन्द्रियाणां प्रवृत्तिः । वाङ्माऽऽद्याऽऽलोचनरूपा, आन्तरी जीवनयोनिप्रयत्नरूपा सर्वकरणसाधारणी, अस्याः कार्य्याः पञ्च प्राणादयः । तत्र नासिकाऽग्रादाहृदयं स्थितः प्राणः, आहृदयादानाभि स्थितः समानो भुक्तं समं नयतीति, आनाभेरापादतलं स्थितोऽपानो मलमपनयतीति, आनासाग्रादाशिरोवृत्तिरुदान उत्क्रान्तिहेतुः, सर्वदेहव्यापी व्यानः, तेषु प्राणः श्रेष्ठः । तत्रोदानस्य संयमेन जयादब्धिपङ्ककण्टकादिष्वसक्तो योगी लघुत्वादुपरि गच्छति, स्वेच्छया मरणञ्च लभत इत्यर्थः ॥ ३९ ॥

समानजयाज्ज्वलनम् ॥ ४० ॥

नाभिनिकटस्थाग्निव्यापिनः समानस्य वशीकारादग्नेः "ज्वलनं" भवति, येन ज्वलन्निव दृश्यत इत्यर्थः । एवं प्राणादिजयात् स्वेच्छया तत् क्रियासिद्धिर्बोध्या ॥ ४० ॥

श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ॥४१॥

आहङ्कारिकस्यापि श्रोत्रस्याकाशेनाधाराधेयभावोऽस्ति । उपलक्षणमेतत् । त्वग्वायोः, चक्षुस्तेजसोरब्रसनयोः, घ्राणभूम्योः, सम्बन्धेषु संयमात् दिव्यानीन्द्रियाणि श्रावणवेदनाऽऽद्युक्तसंज्ञानि सम्भवन्ति, यैर्दिव्यशब्दादीन् युगपज्जानातीत्यर्थः ॥ ४१ ॥

कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ॥ ४२ ॥

तयोः संयोगं जित्वा लघुनि तूलादौ वा तद्भावेन समाधिना

लघुकायो भूत्वाऽऽदौ जले विहरति। तत ऊर्णनाभितन्तुषु विहरति। पश्चात् सूर्य्यरश्मिषु। ततो यथेष्टमाकाशे गच्छतीत्यर्थः॥ ४२॥

वहिरकल्पिता वृत्तिर्महाविदेहा ततः प्रकाशावरणक्षयः॥ ४३॥

देहेऽहंभावे सत्येव, मे मनो वहिरस्विति कल्पनया मनसो देहात् "वहिः" वृत्तिलाभो भवति, सा कल्पिता विदेहाऽऽख्या धारणा तया देहेऽहंभावत्यागे सति स्वत एव वहिर्वृत्तिलाभो भवति सेयं "अकल्पिता" महाविदेहाऽऽख्या धारणा। "ततः" प्रकाशस्वभावस्य चित्तस्य क्लेशकर्माद्यावरणक्षयो भवति। ततः सर्वज्ञत्वलाभ इत्यर्थः॥ ४३॥

स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः॥४४॥

पञ्चभूतानां स्थूलं दृश्यमानमवयवसंस्थानं पृथिवीत्वादिजातिमत् क्रमेणैकैकन्यूनैः शब्दादिभिः पञ्चगुणैः स्थूलैर्युक्तमित्येकं रूपम्। अथ द्वितीयं तेषां स्वरूपं क्रमेण काठिन्यस्नेहोष्णप्रेरणसर्वगतत्वलक्षणं, प्रेरणा वायोस्तृणादिवाहकत्वम्। अथ तृतीयं तेषां रूपं सूक्ष्मं कारणं परमाणवः, तेषां सूक्ष्माणि पञ्चतन्मात्राणि। अथ चतुर्थं तेषां रूपं गुणत्रयं तद्धि स्वकारणत्वेनान्वेतीत्यन्वयः सामान्यम्। अथ पञ्चमं तेषां भूतानां रूपमर्थवत्त्वं भोगापवर्गसामर्थ्यं गुणनिष्ठं स्वेषु गुणान्वयादागतम्। एवं भूतानां पञ्चरूपेषु कार्य्यस्वरूपहेतुषु स्थूलादिक्रमेण संयमात् भूतानि योगिसङ्कल्पानुसारीणि भवन्ति, वत्सानुसारिण्य इव गाव इत्यर्थः॥ ४४॥

ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च॥ ४५॥

"ततो" भूतजयाद्योगिनोऽणिमाद्यष्टसिद्धयः प्रादुर्भवन्ति। परमाणुतुल्यत्वमणिमा, विभुत्वं महिमा, तूलपिण्डवल्लघुत्वं लघिमा, मेरुवद् गुरुत्वं गरिमा, अङ्गुल्या चन्द्रसंस्पर्शनं प्राप्तिः, सत्यसङ्कल्पत्वं प्राकाम्यम्, भूतनियन्तृत्वं वशित्वं, भूतस्रष्टृत्वमीशित्वमित्यष्टैश्वर्य्याणि। अत्र प्राप्यन्तानि स्थूलसंयमात् सिद्ध्यन्ति। स्वरूपसंयमात् प्राकाम्यम्। अवशिष्टं हेतुसंयमादिति विभागः। "कायसम्पत्" वक्ष्यते, तस्य कायस्य भूतधर्मैः काठिन्यादिभिरनभिघातश्च भूतजयात् सिद्ध्यति। येन शिलाऽन्तः प्रविशति, शीतोष्णादयो न बाधन्त इत्यर्थः॥ ४५॥

रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत्॥४६॥

चक्षुःप्रियं रूपं, लावण्यं सर्वाङ्गसौन्दर्य्यं, बलं वीर्य्यं, वज्रस्येव संहननमवयवव्यूहे यस्य तद्भावो वज्रसंहननत्वं, हनुमति प्रसिद्धम्॥ ४६॥

भूतजयानन्तरमिन्द्रियजयोपायमाह :—

ग्रहणस्वरूपास्मिताऽन्वयार्थवत्त्वसंयमादिन्द्रियजयः॥ ४७॥

शब्दः षड्जादिः, स्पर्शः शीतादिः, रूपं पीतादिः, रसो मधुरादिः, गन्धः सुरभ्यादिरिति, सामान्यविशेषात्मकशब्दादिगोचराः पञ्च वृत्तयः कार्य्याः श्रोत्रादीन्द्रियाणां ग्रहणानि प्रथमं रूपं, प्रकाशकत्वं स्वरूपं तेषां द्वितीयं, अस्मितालक्षणसात्विकाहङ्कारः कारणं तेषां तृतीयम्। अन्वयार्थवत्त्वे चतुर्थपञ्चमे व्याख्याते। तेषु पञ्चस्विन्द्रियरूपेषु संयमात् "इन्द्रियजयो" भवति॥ ४७॥

ततः किं तत्राह :—

ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ॥४८॥

मनोवत् कायस्यानुत्तमो गलिताभो "मनोजवित्व",''विदेहा-नपेक्षाणामिन्द्रियाणां दूरवाह्यार्थज्ञाने विकरणत्वं "विकरण-भावः," प्रधानस्यान्वयस्य चतुर्थरूपस्य जयः सर्वजगद्वशित्वमिति सिद्धय इन्द्रियजयाङ्गवन्तीत्यर्थः। एता अणिमाद्याः प्रधान-जयान्ताः सिद्धयोऽस्मिन् शास्त्रे "मधुप्रतीका" उच्यन्ते, मधुन एकदेशवदास्वाद्यन्त इति मधुप्रतीका मधुतुल्या इत्यर्थः। यद्वा स्थूलादिप्रधानान्तवस्तुविषया योगजन्यर्त्तम्भरप्रज्ञा मधु तत्-प्रतीकं कारणं साक्षात्कृतं भूतेन्द्रियजयद्वारा यासां ता मधु-प्रतीकाः ॥ ४८ ॥

एवं संयमात् ज्ञानक्रियासिद्धयः साक्षाच्छ्रद्धाद्वारा आविवेक-ख्यात्यर्था उपन्यस्ताः। सम्प्रति विवेकख्यातेरवान्तरसिद्धि-माह :—

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधि-ष्ठातृत्वं सर्वज्ञातृत्वञ्च ॥ ४९ ॥

पूर्वोक्तस्वार्थसंयमेन निर्द्धूतरजस्तमोमलस्यान्तःकरणस्य जये वशीकारसंज्ञायामपरस्यां विरक्तौ स्थितस्य बुद्धिसत्त्वात्मनोर्भेद-ख्यातिर्जायते तस्मात्तस्य तदावृत्तिपरस्य योगिनः सर्वेषां भावानां प्रधानतत्परिणामानामधिष्ठातृत्वं नियन्तृत्वं, सर्वेषां भूतभवद्-भाविनां ज्ञातृत्वञ्च सिद्ध्यति। एषा "विशोका" नाम सिद्धिः॥४९॥

अधुना विवेकख्यातेर्मुख्यां सिद्धिमाह :—

तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ॥ ५० ॥

तस्यां विशोकायां सिद्धौ [illegible] विवेकख्यातावपि

RAMAKRISHNA MISSION INSTITUTE OF CULT
LIBRARY

वैराग्यं परं भवति। ततो दोषाणां क्लेशानां वीजं भ्रान्ति-संस्कारस्तस्य क्षये सर्वात्मना तिरोभावे सति चित्तस्य परवैराग्य-संस्कारशेषतायां पुरुषस्य स्वरूपप्रतिष्ठत्वं "कैवल्यं" सिद्ध्यति। इयं संस्कारशेषाऽऽख्या सिद्धिः॥ ५०॥

अत्र विघ्नोत्पत्तौ निरासोपायमाह :—

स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्ट-प्रसङ्गात्॥ ५१॥

चत्वारः खल्वमी योगिनः। प्रथमकल्पिको, मधुभूमिकः, प्रज्ञाज्योतिः, अतिक्रान्तभावनीयश्च। तत्राद्यः संयमे प्रवृत्तमात्रो न किञ्चित्परचित्तादिकं जानाति। द्वितीयः संप्रज्ञातयोगेन मधुमतीं चित्तभूमिमृतम्भराप्रज्ञाऽवस्थां लब्ध्वा भूतेन्द्रियाणि साक्षात्कृतानि विजिगीषते तज्जयद्वारा पूर्वोक्ताः क्रमेण मधु-प्रतीका विशोका संस्कारशेषा चेति तिस्रो भूमीर्लब्धुकामः। तृतीयस्तु जितभूतेन्द्रियत्वान्महेन्द्रादिभिरत्तोभ्यो लब्धभूमि-द्वयो विशोकाऽऽदिभूमिद्वयसिषाधयिषया स्वार्थसंयमयत्नवान्। चतुर्थस्तु भगवान् महाऽनुभावो लब्धविवेकान्तभूमित्रयो विरक्तो विघ्नशङ्काशून्यो जीवन्मुक्तश्चतुर्थभूमौ वर्त्तते। यस्य सप्तधा प्रान्तभूमिः प्रज्ञा व्याख्याता। तत्राद्यस्य योगिनो देवनिम-न्त्रणयोग्यता नास्ति। अतः परिशेषान् मधुभूमिको योगी द्वितीयो यस्तस्य स्थानिभिः तत्तत् स्थानस्वामिभिर्महेन्द्रादिभि-रुपनिमन्त्रणं प्रार्थनं क्रियते, भोः इहास्यतां स्वर्गादिस्थाने, रम्यतां कमनीयेयं कन्या, दिव्योऽयं भोगो, रसायनमिदं जरामृत्यु-निवारकमिदं कामगं यानमित्येवं प्रार्थने सङ्गः कामः, अहो ममायं योगप्रभाव इति स्मयश्च न कर्त्तव्यः। किन्तु इत्थं तत्र दोषं भावयेत् घोरेषु संसाराङ्गारेषु पापच्यमानेन मया जन्म-

स्मृतिप्रबन्धचक्रारूढेन कथञ्चिदासादितः क्लेशकर्मान्धकार-विध्वंसियोगप्रदीपः, तस्य चैते तृष्णायोनयो विषयवायवः प्रतिपक्षाः, स खल्वहं लब्धालोकः कथमनया मृगतृष्णया वञ्चितः, तस्यैव पुनः पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिन्धनीकुर्य्यामिति स्वस्ति वः स्वप्नोपमेभ्यः क्षपणप्रार्थनीयेभ्यो विषयेभ्य इत्येवं निश्चितमतिः, समाधिं भावयेत् । सङ्गे पातित्यं, स्मये कृतकृत्यमन्यस्य योगासिद्धिः, ततो योगभ्रष्टस्य पुनः संसारस्यानिष्टस्य प्रसङ्गात् सङ्गस्मययोरकरणं कैवल्यविघ्ननिरासोपाय इत्यर्थः ॥५१॥

पूर्वं बुद्धिप्रतिबिम्बितपुरुषस्य स्वार्थसंयमात्तारकं विवेकज्ञानमुक्तं, तच्चोपायान्तरमाह :—

क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ॥५२॥

अभेद्यः कालभागः सत्यः क्षणः । अन्ये मुहूर्त्तादयः कालभागाः क्षणसमूहरूपा असत्याः । न हि क्षणानां समूहो वस्तु सन् तत्रायमस्मात् पूर्वक्षणोऽयमुत्तरक्षण इति क्षणानां, तेषां क्रमस्य, पौर्वापर्य्यस्य संयमादतिसूक्ष्माणां भेदसाक्षात्कारो विवेको भवति । तेन च युगपद्विद्यदादीनां पुरुषान्तानां ज्ञानं साक्षात्काराख्यं जायत इत्यर्थः ॥ ५२ ॥

इदं क्षणसंयमजं ज्ञानं सर्वविषयमित्यग्रे वक्ष्यते । सम्प्रति सूक्ष्मं तस्य विषयविशेषमाह :—

जातिलक्षणदेशैरन्यताऽनवच्छेदे तुल्ययोस्ततः प्रतिपत्तिः ॥ ५३ ॥

अवच्छेदो निश्चयः । लोके हि भावानां त्रयो भेदनिश्चयहेतवः । तत्र देशेन लक्षणेन च तुल्ययोर्योगवययोर्जात्या भेदधीः । देशजातिभ्यां तुल्ययोगवोः क्षणभेदादिलक्षणेन भेदधीः । जाति-

लक्षणाभ्यां तुल्ययोरामलकयोः पूर्वोत्तरादिदेशभेदान्नेदनिश्चयः यदा पुनर्योगिनो ज्ञानपरीक्षार्थं केनचित् पूर्वदेशस्थमामलक मुत्तरामलकदेशे विन्यस्योत्तरामलकमन्यव्यासक्ते योगिन्यपहृतं तदा तयोरामलकत्वजातिरूपपरिणामादिलक्षणेन देशेन च "तुल्ययोः" जात्यादिभिरन्यत्वनिश्चयासम्भवात् "ततः" क्षण-संयमजविवेकज्ञानादेवान्यत्वंप्रतिपत्तिर्योगिनो भवति । यस्मिन् क्षणे पूर्वामलकमुत्तरत्र विन्यस्तं, तस्मात् प्राचीनक्षणेषु तस्मिन् पूर्वदेशस्थरूपपूर्वपरिणाममाला जाता नोत्तरामलके, तस्य तेषु क्षणेषूत्तरत्वपरिणाममालावत्त्वात्, तथा च क्षणक्रमज्ञो योगी तयोः पूर्वोत्तरस्वपरिणाममालाक्षणेभ्योऽस्य क्षणस्यानन्तर्यं जानन्नधुनेदमुत्तरमितः प्राक् पूर्वं नोत्तरमिति भेदं निश्चिनोतीत्यर्थः ॥ ५३ ॥

तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानम् ॥ ५४ ॥

तत्तत् संयमात् सर्वज्ञतोक्ता, सा प्रकारमात्रविषया यथा रसवत्यां निष्पन्नैः सर्वैर्व्यञ्जनैर्भुक्तमिति सर्वैर्व्यञ्जनप्रकारैर्भुक्तमिति गम्यते । तद्यथा पुनः पात्रस्थैः सर्वैर्व्यञ्जनैरुपनीतं सर्वमन्नं भुक्तमित्युक्ते स्वरूपतः प्रकारतश्च निशेषं भुक्तमिति गम्यते, तद्वदिदं क्षणसंयमजं विवेकज्ञानं सर्ववस्तुस्वरूपविषयं, "सर्वथाविषयं" सर्वप्रकारविषयं, पुरुषतत्त्वावगाहित्वात् संसारसागरात्तारयतीति "तारक"-संज्ञं "अक्रमं" युगपदेव करतलामलकवत् सर्वसमूहावलम्बनमित्यर्थः ॥ ५४ ॥

एवं विवेकख्यातिकाष्ठाऽवधिकान् तत्तद्विभूतिफलान् संयमानुपन्यस्य ताद्दशविवेकख्यातिकाष्ठाऽस्तु वा मा वा सत्त्व-पुरुषान्यताप्रत्ययसाक्षात्कारमात्रं मुक्तये कल्पत इत्यभिप्रेत्याह :—

सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ॥५५॥

निरस्तसमस्तरजोमलस्य बुद्धिसत्त्वस्य विवेकख्यात्या संस्कारशेषस्य सर्ववृत्तिशून्यत्वं शुद्धिः, पुरुषस्यापि नित्यशुद्धस्य तदा कल्पितभोगशून्यत्वं शुद्धिः, एवं तयोः "शुद्धिसाम्ये" सति "कैवल्यम्"। तत्तद्विभूतयस्तु श्रद्धोत्पादनार्थमुपन्यस्ताः। कैवल्यं तु बुद्धिविलक्षणपुरुषसाक्षात्कारमात्रादविद्यानिवृत्तावनागत-दुःखानुत्पादरूपं सिध्यतीत्यर्थः ॥ ५५ ॥

इति विभूतिपादः ॥ ३ ॥

कैवल्यपादः ।

सर्वसाधनसिद्धीनां या स्यात् सिद्धिरनुत्तमा ।
कैवल्यरूपा तन्मात्रं सीतारामं नमाम्यहम् ॥

प्रथमद्वितीयपादयोर्योगतत्साधने प्रतिपादिते। तृतीये संयमसंज्ञमन्तरङ्गत्रयं संयमस्य लक्ष्याः परिणामभेदाः सिद्धय-श्चोक्ताः। तत्र काश्चिदतीतानागतज्ञानादिसिद्धयः श्रद्धाद्वारा कैवल्ययोगस्याङ्गम्। काश्चिदिन्द्रियजयादयः साक्षादङ्गम्। तारकसंज्ञविवेकज्ञानसिद्धिर्योगस्य फलमिति निरूपितम्। इदानीं कैवल्यस्वरूपं प्राधान्येन प्रतिपादनीयं, तदर्थं कैवल्य-भागीयं चित्तं परलोकः क्षणिकविज्ञानातिरिक्तात्मा चित्त-विकारसुखादिभोक्ता धर्ममेघश्च वक्तव्यः प्रासङ्गिकं चान्यद्वक्तव्य-मिति चतुर्थः पाद आरभ्यते। तत्र प्रथमसिद्धचित्तेषु कैवल्य-योग्यं चित्तं वक्तुकामः पूर्वोक्तसिद्धीनां हेतुभेदात् पञ्चविधत्वमाह :—

जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः ॥ १ ॥

जन्मना यक्षादीनामाकाशगमनादिसिद्धिः कपिलादीनां च

सांसिद्धिकीत्युच्यते। ओषधिविशेषसेवया माण्डव्यादीनाम्। मन्त्रजपेन केषाञ्चिदणिमादिसिद्धिः। तपसा विश्वामित्रादीनां सिद्धिः। एताश्चतस्रः "सिद्धयः" पूर्वजन्माभ्यस्तयोगजा एव जन्मादिनिमित्तेन व्यज्यन्ते। अत एव योगाभ्यासे विश्वासेन प्रवृत्तिरिह सिद्ध्यदर्शनेऽपि जन्मान्तरे साफल्यात्। "समाधिजास्तु" पूर्वपादे व्याख्याताः॥ १॥

ननु तपःप्रभावादिहैव नन्दीश्वरस्य श्रीगौरीवल्लभकटाक्षवीक्षणेन देवशरीरपरिणामः श्रूयते। तत्र न तावदयं नरदेहो देवादिदेहस्योपादानं तस्मिन् स्थिते परिणामान्तरायोगान्नष्टस्याहेतुत्वात्। नापि तदवयवा एवोपादानं नरदेहमात्रहेतोर्विलक्षणकार्य्यकारित्वायोगादित्याशङ्क्याह :—

जात्यन्तरपरिणामः प्रकृत्यापूरात्॥ २॥

प्रधानादयः पृथिव्यन्ताः प्रकृतयस्तासां सर्वत्र सत्त्वान्नरादिदेहावयवेषु तासामापूराद्धर्मादिनिमित्तानुरोधेनावयवानुप्रवेशात् "जात्यन्तरपरिणामः" युज्यते यथाऽग्निकणस्य प्रकृत्यनुग्रहाद्दनादौ बहुतृणादिमण्डलव्यापित्वं तद्वदित्यर्थः॥ २॥

ननु प्रकृत्यापूरो धर्मादिनिमित्तमपेक्षते न वा? न चेत्सर्वत्रापूरापत्तिः। नाद्यः। धर्मादेः प्रवर्त्तकत्वे पुरुषार्थः प्रवर्त्तक इति सिद्धान्तविरोधादित्यत आह :—

निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्॥ ३॥

निरीश्वरसांख्ये हि पुरुषार्थ एवानागतः प्रकृतीनां प्रवर्त्तकः। अस्माकं तु सेश्वराणां तदुद्देशेनेश्वरः प्रवर्त्तक इत्युद्देश्यतया पुरुषार्थः प्रवर्त्तक इत्युच्यते। "निमित्तं" तु तासां न प्रवर्त्तकं

तत्कार्य्यत्वात्। किन्तु "ततो" निमित्तादरणस्य प्रतिबन्धस्य बाधो भवति धर्मेणाधर्मनिरासे प्रकृतयः स्वयमेव देवादिपरिणामे प्रवर्त्तन्ते पापातिशयेन पुण्यप्रतिबन्धे सति तिर्य्यगादिपरिणामो यथा नहुषस्य सर्पपरिणामः। "चेत्रिकवत्" इति यथा चेत्रिकः क्षपीवलो जलस्योन्नतदेशादिवरणभेदनमात्रं करोति ततो जलं स्वयमेव केदारान्तरे प्रवर्त्तते तद्वदित्यर्थः॥ ३॥

ननु यदा योगी युगपद्भोगार्थं बहून् कायान् निर्मिमीते तदा तेषु चित्तानि कुतो भवन्त्यत आह :—

निर्माणचित्तान्यस्मितामात्रात्॥ ४॥

योगप्रभावान्निर्मीयन्त इति निर्माणानि चित्तानि योगिसङ्कल्पाधीनप्रकृत्यापूरात्कायवदहङ्कारात्प्रकृतेर्जायन्त इत्यर्थः॥४॥

तर्हि चित्तानां भिन्नभिन्नाभिप्रायत्वाद् योगिनो भोगासिद्धिरित्यत आह :—

प्रकृतिभेदे प्रयोजकं चित्तमेकमनेकेषाम्॥ ५॥

निर्मितचित्तानां योगी स्वभोगानुकूलप्रवृत्तिविशेषनियामकं चित्तं निर्मिमीते योगबलात्तत् "चित्तं" तेषां नायकं भवति तेन भोगस्तदनुसन्धानं युज्यत इत्यर्थः॥ ५॥

एवं जन्मादिभिः पञ्चविधानि 'सिद्धचित्तान्युक्तानि तेष्वपवर्गभागीयं चित्तं निर्द्धारयति :—

तत्र ध्यानजमनाशयम्॥ ६॥

"तत्र" तेषु जन्मादिजेषु यत्समाधिजं तत् "अनाशयं" क्लेशवासनाशून्यं मोक्षयोग्यमित्यर्थः॥ ६॥

योगिनश्चित्तवत्कर्मापि विलक्षणमित्याह :—

कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्॥७॥

वाङ्मनससाध्यं सुखैकफलकं शुक्लं कर्म स्वाध्यायतपःशीलानां भवति । दुःखैकफलकं कर्म कृष्णं दुरात्मनां भवति । सुख-दुःखमिश्रफलकं वहिःसाधनसाध्यं शुक्लकृष्णं सोमयागादि-रतानां भवति । तत्र व्रीह्यादिवधेन पिपीलिकाऽऽदिपरिपीड़या दक्षिणादानादिपरानुग्रहेण च योगादिदं "त्रिविधं" कर्म "इतरे-षाम्" अयोगिनां भवति । "योगिनस्तु" संन्यासिनो वाह्यसाधन-साध्यकर्मत्यागात्र शुक्लकृष्णं कर्म, क्षीणक्लेशत्वान्न कृष्णं, योग-जधर्मस्य फलमनभिध्यायेश्वरार्पितत्वान्न शुक्लं कर्मास्ति, अत-श्चित्तशुद्धिविवेकख्यातिद्वारा मोक्षैकफलकं "अशुक्लाकृष्णं" "कर्म" इत्यर्थः ॥ ७ ॥

कर्मणः प्रसङ्गाद्वासनाऽभिव्यक्तिफलमाह :—

ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासना-नाम् ॥ ८ ॥

"ततः" त्रिविधात्कर्मणो मरणकालानन्तरं जात्यायुर्भोगरूप-विपाकदानायाभिव्यक्तौ तस्य विपाकस्यानुगुणानां "वासना-नाम्" अभिव्यक्तिर्भवति न विरुद्धानामित्यर्थः । देवत्वप्राप्तौ चित्ते प्रसुप्ता एव नरकभोगवासना भवन्ति तासामभिव्यक्तौ दिव्य-भोगायोगादितिभावः ॥ ८ ॥

ननु स्वर्गदेशे देवजन्मनि जातास्तद्भोगेभ्यो वासनाः कथं नरव्याघ्रादिजन्मसहस्रव्यवधानानन्तरं पुनर्दैवजन्मन्यभिव्य-ज्यन्ते । अनन्तरजन्मपूर्ववासना एव पूर्वदिनवासनावत् कुतो न व्यज्यन्त इत्यत आह :—

जातिदेशकालव्यवहितानामप्यानन्तर्य्यं स्मृति-संस्कारयोरेकरूपत्वात् ॥ ९ ॥

यद्यपि सुप्तोत्थितस्यानन्तरपूर्वदिनानुभवजवासनाः प्रायेणाभिव्यज्यन्तेऽव्यवधानात् तथाऽप्यनादिसंसारे येनकर्मणा यज्जन्मनि भोगैर्वासनाः सञ्चिताः तासां जन्मकोट्या देशेन कल्पशतेन च व्यवहितानामपि तज्जातीयेन कर्मणा तज्जन्मनि पुनः प्राप्ते सति तेनैव कर्मणा जन्मना वाऽभिव्यक्तानामानन्तर्य्यमव्यवहितत्वं स्मृतिद्वारा भोगादिहेतुत्वमिति यावत्। विजातीयकर्मारब्धानन्तरपूर्वजन्मवासनानां व्यञ्जकाभावात् प्रसुप्तिरेव व्यवहितानामपि कर्मजन्मनोरभिव्यञ्जकयोः सत्त्वादभिव्यक्तिर्युक्ता। न च विजातीयत्वेऽप्यव्यवधानादनन्तरपूर्ववासना एव ताभ्यां स्मृत्यार्थमभिव्यज्यन्तामिति वाच्यम्। स्मृतिसंस्कारयोरेकरूपत्वादयमर्थः क्रिया ज्ञानमन्यद्वा रागादिकं शक्त्यात्मना स्थितः संस्कारः। स च स्वसमानविषयकक्रियास्मृत्यादिहेतुः। क्रियासंस्कारः क्रियात्मना, ज्ञानसंस्कारः स्मृत्यात्मना, अन्यसंस्कारोऽन्यात्मना, परिणमत इति यावत्। एवं स्मृतिसंस्कारयोरभेदेनैकविषयत्वेन चैकरूपत्वात् आनन्तर्य्यशब्दितः कार्य्यकारणभावो न विजातीययोः। न हि व्यवधानं संस्कारस्य विरूपकार्य्यकारित्वमापादयति घटानुभवजसंस्कारादनन्तरमननुभूतस्मृत्यापत्तेरिति ॥ ९ ॥

ननु जन्मान्तरितवासना न सन्तीति वदन्तं चार्वाकं प्रत्याह :—

तासामनादित्वं चाशिषो नित्यत्वात् ॥ १० ॥

न केवलं "तासां" वासनानामानन्तर्य्यं किन्तु अनादित्वमपीति चार्थः। कुतः? सदाऽहं भूयासमित्याशिषो मरणवासस्य नित्यत्वात् सर्वजनेष्वव्यभिचारादित्यर्थः। इदमत्राकूतम्। जातमात्रस्य कम्पाद्यनुमितो मरणत्रासो हेयदुःखस्मृतिमव्यभिचारात् कल्पयति, सा वासनां, साऽपि मरणजदुःखानुभवं,

सोऽस्मिञ्जन्मन्यसम्भाव्यमानो जन्मान्तरं, कल्पयतीत्यनादित्व-सिद्धिरिति। ननु देहस्यानात्मत्वे कस्य जन्ममरणत्रासः आत्मनोऽनाद्यन्तस्योभयत्वादिति चेत्, चित्तस्येति ब्रूमः तस्यैव श्रुना-दिवासनाऽनुविद्धस्य चित्तस्याहङ्कारिकत्वेन विभुनस्तत्तद्देह-सङ्कोचविकासशीलवृत्तिलाभो जन्मवृत्त्युपरमो मरणं तत्काले दुःखमित्यादिसर्वसंसारः॥ १०॥

नन्वनादिवासनानां कथमुच्छेदस्तत्राह :—

हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः॥ ११॥

नैताः पुरुषवदनादयः किन्तु कार्य्या एव प्रवाहा अनादयः अतः कारणोच्छेदादुच्छेदसम्भवः। तथा हि पूर्वपूर्वभ्रमसंस्कार-लक्षणाविद्याऽहमित्यस्मिताहेतुः सा च नरोऽहं ममेदमनिष्ट-मिति भ्रमहेतुः सोऽपि रागद्वेषयोस्तौ च परनिग्रहादिद्वारा धर्माधर्मयोस्तौ च भोगे सोऽपि वासनासु ताः पुनर्भ्रमादिष्व-नादिसंसारचक्रमनिशमावर्त्तते। तत्र वासनानां क्लेशकर्माणि हेतवः, देहाद्युभोगाः फलं, चित्तमाश्रयः, शब्दादिकमालम्बनम्, एतैः"संगृहीतत्वादेषां" क्रियायोगाङ्गयोगजाविप्लवविवेकख्यात्या उच्छेदे सति कारणानामभावादुच्छेदो भवतीत्यर्थः॥ ११॥

ननु सतां संस्काराणां कथमभावः इत्यत आह :—

अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद्धर्मा-णाम्॥ १२॥

नासतामुत्पादो न सतां विनाशः "नासतो विद्यते भावो नाभावो विद्यते सतः" इति परमेश्वरगीतास्मृतेः। "वेदाहं समतीतानि वर्त्तमानानि चार्जुन भविष्याणि च भूतानि" इति वर्त्त-

मानवदतीतानागतस्य प्रत्यक्षवेद्यत्वोक्तेश्च न ह्यसतः प्रत्यक्षवेद्यत्वं सम्भवति तस्मादतीतानागतं धर्मजातं धर्मिणि शक्तिरूपेणास्तेव यत्परिणामत्रयसंयमादिना योगिनः साक्षात्कुर्वन्ति कुलालादयश्च बुद्धावालिख्य कुर्वन्ति यदाऽन्वयी धर्मी स्थिर एक उक्तः। ननु तर्हि वासनाऽऽदिबन्धसत्त्वात्तत्त्वज्ञानवैयर्थ्यमिति चेन्न। धर्माणामनागताद्यध्वनां भेदाद्वर्त्तमानाध्वनि हि दुःखादिवासनाचित्रं साधिकारमसंख्येयपरिणामशीलं चित्तं भोग्यताऽऽपन्नं बन्ध उच्यते। तत्त्वज्ञाने सति निरधिकारमतीताध्वनि प्रवेशितं प्रकृत्यात्मना सदपि पुनरुत्थानबीजस्य कर्त्तव्यपुरुषार्थस्य क्षतत्वान्न पुनरावर्त्तत इत्यर्थः॥ १२॥

अतीतानागतं स्वरूपतोऽस्तीत्युक्तं तत्र किं स्वरूपमित्यत आह :—

ते व्यक्तसूक्ष्मा गुणात्मानः॥ १३॥

व्यक्ता वर्त्तमानाध्वानः, सूक्ष्मा अतीतानागताध्वानः, ते महदादयो घटादिविशेषान्ताः गुणात्मानः सत्त्वरजस्तमःस्वरूपा इत्यर्थः। सर्वे भावाः सुखदुःखमोहात्मकगुणान्वितत्वेन तत्प्रकृतित्वात् तत्स्वरूपा एव यथा घटादयो मृदन्विताः मृत्स्वरूपाः प्रकृतिविकारयोर्भेदाभेदरूपतादात्म्यात्तत्र गुणाः परिणामिनित्याः। अन्ये सर्वे भावाः प्रतिक्षणपरिणामाः क्षणविध्वंसिनः। पुरुषस्तु कूटस्थः। तदुक्तं भाष्ये :—

"गुणानां परमं रूपं न दृष्टिपथमृच्छति।
यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम्" ॥ इति।

ऐन्द्रजालिकवत् क्षणविध्वंसीत्यर्थः॥ १३॥

ननु यदि त्रयो गुणाः परिणामिनः तर्हि परिणामानां प्रत्येकमेकत्वं न स्यात् न हि मृत्तन्तुदुग्धानामेकः परिणामो दृष्ट इत्यत आह :—

परिणामैकत्वाद्वस्तुतत्त्वम् ॥ १४ ॥

बह्वनामप्येकः परिणामो दृष्टः यथा क्रमास्थले चिप्पान गजाश्वादीनामेको लवणपरिणामः, वर्त्तितैलाग्नीनामेको दीप परिणामः, मृदादीनां त्वङ्गाङ्गित्वाभावान्न परिणामैकत्वम् गुणानां तु परिणामस्याङ्गाङ्गिभावस्यैकत्वाद्वस्तुनो महदादेस्तत्त्व मेकत्वं युज्यते। तत्र सत्त्वस्याङ्गित्वे गुणत्रयादेको महान्, तस्मा देकस्माद्रजःप्रधानादहङ्कारः, तमःप्रधानात् पञ्चतन्मात्राणि प्रत्येकमेकत्ववन्ति भवन्ति, अहङ्कारात् सात्त्विकाद्दशेन्द्रियाणि, राजसात् कर्मेन्द्रियाणि, उभयात्मकान्मनः। एवं शब्दतन्मात्र स्याङ्गित्वे सत्याकाशः पञ्चतन्मात्राणामेकः परिणामः। एवं स्पर्श रूपरसगन्धतन्मात्राणां क्रमेणाङ्गित्वे वायुग्नयम्बुवनयः प्रत्येकं जायन्ते। एकस्माद्बहवः परिणामास्तु बहुपरिणामवासनारूप शक्तिवैचित्र्यादित्यलं विस्तरेण ॥ १४ ॥

ननु क्षणिकविज्ञानात्मकचित्तातिरिक्तं वस्तु नास्त्येव यत्प्रमेयं तद्विज्ञानाभिन्नं, यथा विज्ञानं, प्रमेयाश्च घटादयोऽतः कस्यैकत्व नानात्वचिन्ता चित्तमेव ह्यनादि समनन्तरप्रत्ययात्मकवासना विचित्रं द्रव्यगुणात्मना भातीति वदन्तं बौद्धं प्रत्याह :—

वस्तुसाम्येऽपि चित्तभेदात्तयोर्विभक्तः पन्थाः ॥१५॥

तयोश्चित्तवस्तुनोः "विभक्तः" "पन्था" भिन्नो मार्गः विज्ञानार्थ योर्भेद इति यावत्। कुतो वस्तुनः स्त्रीपिण्डादेः साम्येऽपि चित्तानां भेदाद्यदेकस्यां नार्य्यां पत्युः सुखविज्ञानं, सपत्न्या दुःखविज्ञानं, तदलाभे कामुकस्य मोहो विषादस्तद्विज्ञानं, निष्कामस्योपेक्षाविज्ञानं, सर्वेषां या त्वया दृष्टा सा मयाऽपि दृष्टेत्यबाधितप्रत्यभिज्ञानादेकं वस्तुनेकं विज्ञानमिति तयोर्भेदः। यदेकं तदनेकेभ्यो भिन्नं, यथा नीलविज्ञानं पीतविज्ञानेभ्यः,

एकं च वस्तुतः स्वगोचरानेकविज्ञानेभ्यो भिन्नम्। न च प्रमेयस्य प्रमैक्यं युक्तम्। एकत्वे विषयविषयित्वविरोधाद्ग्राह्यार्थाभावे विज्ञानानां नीलपीताद्याकारत्वायोगाच्च। न च प्रमेयात्मकवासना तत्र हेतुरिति वाच्यम्। नष्टस्याहेतुत्वात्। न चैकरूपादर्थात्तव कथं चित्तवैचित्र्यमिति वाच्यम्। अर्थस्य त्रिगुणत्वाद्धर्माधर्मा-विद्याऽपेक्षयाऽर्थगतानां सत्त्वरजस्तमसामुद्रेकात् सुखदुःखमोह-विज्ञानहेतुत्वं तत्त्वज्ञानापेक्षया गुणानां साम्यादुपेक्षाहेतुत्वमिति युक्तत्वात्तस्मादस्ति विज्ञानातिरिक्तोऽर्थः ॥ १५ ॥

यत्तु कश्चिदाह। अस्तु विज्ञानादन्योऽर्थः स तु जड़त्वादि-ज्ञानग्राह्यः प्रातिभासिको नाज्ञातोऽस्तीति। स वक्तव्यः कुतस्तु-स्योत्पत्तिरिति, ग्राहकविज्ञानाच्चित्तादिति चेत् किमेकचैत्र-चित्तस्य घटवस्तुकार्यम्, उत चैत्रमैत्राद्यनेकचित्तानां, नाद्य-इत्याह :—

न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ॥ १६ ॥

यद्येकचित्तस्य कार्य्यं घटवस्तु तदा तस्मिंश्चित्ते पटादिषु व्यग्रे तद्वस्तु "प्रमाणकं" "किं" नष्टं "स्यात्" इत्यर्थः। न चेष्टापत्तिः। पुनस्तद्दर्शने सोऽयमित्यबाधितप्रत्यभिज्ञानादेकस्य व्यग्रत्वेऽप्यन्येन दृश्यमानत्वाच्च तस्मानैकचित्ततन्त्रं वस्तु नाप्यनेकचित्ततन्त्रं प्रातिभासिकस्य स्वप्नवदेकचित्ततन्त्रत्वनियमात् पूर्वमेकेन दृश्य-माने घटे बहुचित्तैः पश्चात्सम्बन्धे विलक्षणघटान्तरोत्पत्तिप्रसङ्गाच्च सामग्रीवैलक्षण्यात्। किं चोदरदर्शनकाले पृष्ठभागो नास्तीत्युदर-मपि न स्यात् तस्मान्न प्रातिभासिकं वस्तु किन्तु चित्तातिरिक्तं स्वतन्त्रमिति सिद्धम् ॥ १६ ॥

ननु सिद्धान्ते विभुनश्चित्तस्य सर्वसम्बन्धात् सदा सर्वं ज्ञायेतेत्यत आह :—

तदुपरागापेक्षत्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम् ॥१७॥

यद्यप्याहङ्कारिकत्वाच्चित्तेन्द्रियाणि विभूनि तथाऽपि तेषामहङ्कारे सुप्तानां सम्बन्धो विषयस्य स्फूर्त्तावहेतुः किन्तु कर्मणाऽभिव्यक्तानां देहस्थानां, तथा चेन्द्रियद्वारा येनार्थेन "चित्तस्य" उपरागः तस्मिन्नर्थे चित्तं स्वनिष्ठचित्प्रतिविम्बरूपां स्फूर्त्तिं धत्ते तमर्थं स्वाकारवृत्तिद्वारा बुद्धिस्थप्रतिविम्बद्वारा पुरुषश्चेतयते नान्यमिति "वस्तु" "ज्ञाताज्ञातं" भवति। अत एव चित्तं तदर्थोपरागमपेक्ष्य कदाचिद्वस्तु जानाति कदाचिन्नेति ज्ञाताज्ञातविषयत्वात् परिणामीति भावः ॥ १७ ॥

तर्हि आत्मनः परिणामित्वमित्यत आह :—

सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्या-
परिणामित्वात् ॥ १८ ॥

पुरुषस्य हि क्षिप्तमूढादिसर्ववृत्तिकं चित्तं विषयः स यदि चित्तेन स्वविषयशब्दादिवत् पुरुषेण स्वसत्ताकाले न ज्ञायेत तदा चित्तवत्परिणामी स्यात्पुरुषः वृत्तिपरिणामं तत्तदाकारमपेक्ष्य तज्ज्ञातृत्वापातात् तदा किं परिणामिद्वयेनेति चित्तादन्यः पुरुषो न स्यात् सदैव तु स्वसत्ताकाले ज्ञायमानाश्चित्तवृत्तयो भोग्याः शब्दाद्याकाराः तस्य भोग्यस्य प्रभोर्भोक्तुरपरिणामित्वं ज्ञापयन्ति साक्षिणोऽपरिणामित्वादेव हि स्वयं "सदा" "ज्ञाता" भवन्ति नान्यथेत्यर्थः ॥ १८ ॥

ननु चित्तमेव क्षणिकं स्वप्रकाशं स्वस्वार्थयोर्भासकमस्तु किं साक्षिणेत्यत आह :—

न तत्स्वाभासं दृश्यत्वात् ॥ १९ ॥

रूपी घट इतिवत् सुख्यहं, क्रुद्धोऽहं, शान्तं मे मन, इति

"दृश्यत्वात्" चित्तं "स्वाभासं" स्वप्रकाशं "न" भवतीत्यर्थः। अयं भावः। किमिदं स्वप्रकाशत्वं न तावत् स्वाभिन्नप्रकाशक्रियाकर्मत्वं क्रियाकर्मणोरैक्ययोगान्न हि गतिर्गम्यते, किन्तु ग्रामः, नापि पुरुषवच्चित्तस्य स्वभिन्नप्रकाशविषयत्वं क्रुद्धं मे मन इत्यनुभवविषयत्वादतो दृश्यत्वात् स्वातिरिक्तद्रष्टृकं चित्तं सोऽहमितिप्रत्यभिज्ञानान्न क्षणिकमिति ॥ १९ ॥

किञ्च :—

एकसमये चोभयानवधारणम् ॥ २० ॥

क्षणिकवादिन एकस्मिन्नेव क्षणे चित्तचैतन्ययोरुभयोरवधारणं न सम्भवतीत्यर्थः। तथा हि। घटमहमद्राक्षमिति चित्तार्थयोः स्मरणं तयोरनुभवजन्यं तत्र चित्तक्षणे तयोः कथमनुभवः? न च चित्तमेवोभयानुभव इति वाच्यम्। अर्थस्य चित्तजन्यत्वेऽर्थक्षणे चित्तासंस्पर्शादजन्यत्वे तत्समकालत्वेऽपि तदुत्पत्तितादात्म्ययोरभावेन तदुग्राह्यत्वायोगाद् असम्बद्धग्राहित्वे चित्तस्य सर्वज्ञताऽऽपत्तिः। उक्तं हि। "सौगतैः" "अतदुत्पत्तिरतदात्मा च तेन न गृह्यत" इति। न वा चित्तं स्वानुभवं दृश्यत्वादित्युक्तं, नापि चित्तं स्वस्वार्थयोरनुभवद्वयम्। अतिक्षणिकस्योत्पत्तिव्यतिरिक्तव्यापाराभावात्। उक्तं हि। "भूतिर्येषां क्रिया सैव कारकं सैव चोच्यत" इति। न चैकस्माद्व्यापारभेदं विना कार्यभेदो युक्तः। न वा स्वप्ने ज्ञानं ज्ञेयं च युगपत् कर्तुं शक्यं तस्मात्साक्षिणैव चित्तचैतन्ययोरनुभव इति सिद्धम् ॥ २० ॥

ननु माऽस्तु चित्तं स्वदृश्यं चित्तान्तरेण दृश्यतां किं साक्षिणेत्यत आह :—

चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च ॥ २१ ॥

यदि नीलाकारं चित्तं चित्तान्तरेण दृश्यं तदा तदपि बुद्धिरूपं चित्तमन्यया बुद्ध्या साऽप्यन्ययेत्यनवस्थापातात्। न च द्वित्वास्त्रिचतुराः पञ्चषा वा चित्तात्मानो ग्राह्या इति नानवस्थेति वाच्यम्। ग्राहकचित्तस्यानिश्चये ग्राह्यचित्तानिश्चयात् गेहे घटो दृष्टो न वेति संशये, न दृष्ट इति व्यतिरेकनिश्चये, चार्थनिश्चयादर्शनेन ज्ञानचित्तानिश्चयस्यार्थानिश्चयाहेतुत्वात् तत्तदनन्तचित्तानामनुभवे चानन्तचित्तस्मृतीनां सङ्करश्च प्राप्नोति स्मृत्यानन्त्यादशक्यग्रहत्वात् ग्राहकाभावाच्चेयं नीलचित्तस्मृतिरियं पीतचित्तस्मृतिरिति विभागो न स्यादित्यर्थः। चित्तानां समत्वाद् दीपानामिव ग्राहकत्वासम्भवश्च। अतः साक्षिवेद्यं चित्तमिति सिद्धम् ॥ २१ ॥

ननु कूटस्थस्य साक्षिणश्चित्तेन क्रियापूर्वकसम्बन्धाभावात्तेन कथं संवेद्यमित्यत आह :—

चितेरप्रतिसङ्क्रमायास्तदाकारताऽऽपत्तौ स्वबुद्धिसंवेदनम् ॥ २२ ॥

यथा बुद्धेः क्रियया घटादिसंश्लेषः प्रति सङ्क्रमोऽस्ति परिणामित्वान्न तथा चितेर्बुद्धौ प्रतिसङ्क्रमोऽपरिणामित्वात्। किन्तु सूर्यस्य जले प्रतिविम्बवच्चितेर्बुद्धौ प्रतिविम्बे सति बुद्धेश्चिदाकारताऽऽपत्तौ स्वस्य भोग्याया बुद्धेः संवेदनं भवति चिच्छायाग्राह्यत्वसम्बन्धेन चिदुपरक्तं चित्तं चिद्वेद्यमित्यर्थः। "अप्रतिसङ्क्रमायाः"चितेः सान्निध्यात्तस्याश्चितेराकारश्छाया यत्र तस्यां वापत्तौ सत्यां स्वभोग्यबुद्धिसंवेदनमिति योजना ॥ २२ ॥

ननु यदि चित्तातिरिक्त आत्माऽस्ति तर्हि कथं केषाञ्चित् चित्तमेवात्मेति भ्रम इत्याशङ्क्य चित्तस्य सर्वार्थग्रहणसामर्थ्यं तेषां भ्रमबीजमाह :—

द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ॥ २३ ॥

द्रष्टा पुरुषश्चेतनः दृश्यं शब्दाद्यचेतनमिति तत्सर्वं चेतनाचेतनमर्थो विषयो यस्य तत्सर्वार्थं तच्च तत्सान्निध्याच्चिद्रूपतामिव प्राप्तं द्रष्टृ चिदुपरक्तं द्रष्टृविषयं भवति इन्द्रियादिद्वारा दृश्योपरक्तं तदाकारं भवति। तथा च भोग्यशब्दाद्याकारं सुखदुःखादिपरिणामलक्षणभोगात्मकं दृश्यमपि चित्तं चित्प्रतिविम्बाभेदादात्मेति भ्रमः सौगतानां युक्तः। चित्तस्य जपाकुसुमाद्यर्थाकारग्रहणशीलाभिजातस्य स्फटिकमणिकल्पस्य दृश्याकारग्राहित्वाच्चित्तातिरिक्तार्थो नास्तीति विज्ञानवादिनां भ्रमः। अत्रेत्थं विवेकः। चित्तस्य भोग्यत्वाद्भोक्ताऽन्यः स्वीकर्त्तव्यः स नित्योदिता चिच्छक्तिरित्युच्यते। द्विधा चिच्छक्तिः नित्योदिताऽभिव्यङ्ग्या चेति। तत्र नित्योदितायाः कूटस्थचिच्छक्तेः चित्तसत्त्वाभिव्यङ्ग्या चित्प्रतिविम्बरूपा सुखादिसारूप्यमापन्ना चिच्छक्तिर्भोग इत्युच्यते। स द्विविधश्च भोगः चिदवसानतारूप एकः, परिणामलक्षणोऽपरः, तत्राभिव्यङ्ग्या चिच्छक्तिराद्यः पुरुषस्य भोगः, अपरः सुखादिपरिणामो बुद्धेः प्राप्तचैतन्याया इति। इत्थं बुद्धिपुरुषान्तरं विविच्य विध्वस्तसमस्तमलजालं निश्चलप्रदीपशिखाकारं समाहितं प्रशान्तवाहिचित्तं पुरुषसत्तां निश्चिनोतीति तात्पर्य्यम् ॥ २३ ॥

इतश्च चित्तादन्यो भोक्ताऽस्तीत्याह :—

तदसंख्येयवासनाभिश्चित्तमपि परार्थं संहत्यकारित्वात् ॥ २४ ॥

यद्यपि क्लेशकर्मविपाकवासनाभिरनन्ताभिः सुखाद्याश्रयतया भोक्तृकल्पं "चित्त"" तथाऽपि परस्य निरुपचरितचित्स्वभावस्यार्थो भोगापवर्गौ साधयतीति "परार्थं" भोग्यमेव न भोक्तेति यावत्। कुतः? संहत्य देहेन्द्रियादिसङ्घकारिभि-

र्मिलित्वा भोगादिकार्य्यकारित्वात्, यस्मिलित्वा कार्य्यकारि तत्परार्थं, यथा गृहादि, न हि स्तम्भादिभिः संहत्य गृहं स्वस्य वसतिं करोति किन्तु परस्मै विष्णुमित्राय। एवं गुणा अपि बुद्ध्यादिकं परार्थं कुर्वन्तीति युक्तम् अत एव पुरुषशेषत्वाद् गुणा उच्यन्ते। तथा च सत्त्वादयः परार्थाः संहत्य कारित्वाद् गृहवदित्यस्य हेतोः पक्षधर्मतावलाद् गुणैरसंहतः शुद्धो निष्कलः स्वार्थश्चिन्मात्रपरः सिध्यति। यो यस्य भोक्ता स तेनासंहतो, यथा गृहस्वामीति व्याप्तेः गुणभोक्तुरपि परार्थत्वेऽनवस्थानात् "पुरुषान्न परं किञ्चित्" इति श्रुतेश्च। तस्माद्यस्य भोगापवर्गौ गुणमयबुद्ध्या कर्त्तव्यौ सुखदुःखाभ्यां योऽनुकूलनीयः प्रतिकूलनीयश्च स भोक्ताऽस्तीति सिद्धम् ॥ २४ ॥

इयता सूत्रजालेन जन्मादिसिद्धिं, चित्तेषु मोक्षयोग्यचित्तं निर्द्धार्य्य, कर्मवासनाप्रपञ्चपूर्वकं विज्ञानभिन्नार्थसाधनेन परलोकादिप्रपञ्चं परलोकिनं च भोक्तारं निरधारयद्। अधुना कैवल्यं निरूपयितुं तद् योग्यमधिकारिणं दर्शयति :—

विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ॥२५॥

पूर्वसुकृतबलात् कस्यचित्पुरुषधौरेयस्यात्मभावे तत्त्वे भावना जिज्ञासा भवति कोऽहं कस्य कुतो वेति तस्याधिकारिणः पूर्वोक्तविवेकेन बुद्धेरन्यश्चिन्मात्रः पुरुषोऽहमिति "विशेषदर्शिनः" तत्त्वजिज्ञासा विनिवर्त्तते, इच्छायाः स्वविषयलाभनिवर्त्त्यत्वात्। यस्य तु नास्तिकस्य देहाद् बुद्धेर्वाऽन्यो भोक्ता नास्तीत्यनात्मन्यात्मभावना दार्ढ्यं सोऽनधिकारी, यस्तत्त्वजिज्ञासुः सोऽधिकारीति भावः ॥ २५ ॥

ननु तत्त्वजिज्ञासोर्विशेषदर्शनानन्तरं कीदृशं चित्तमित्यत आह :—

तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ॥२६॥

पूर्वं बुद्धादावात्मभ्रमदशायां यच्चित्तं विषयनिम्नं संसार-प्राग्भारमासीत् तदिदानीं निवृत्तभ्रमस्य योगिन-"चित्तं" "विवेकनिम्नं" दृग्दृश्ययोर्भेदो विवेको निम्न आलम्बनभूमिर्यस्य तद्विवेकनिष्ठमिति यावद् अत एव कैवल्यं प्राग्भारोऽवधिर्यस्य तत् "कैवल्यप्राग्भारं" कैवल्यफलावसानं धर्ममेघाख्य-ध्यानरतं भवतीत्यर्थः ॥ २६ ॥

नन्वीदृशस्य चित्तस्याहंममेतिव्युत्थानप्रत्ययाः कुतो भवन्तीत्यत आह :—

तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ॥ २७ ॥

विवेकख्यातिरूपप्रसंख्यानपरस्यान्वहं क्षीयमाणेभ्यो व्युत्थानसंस्कारेभ्यः प्रसंख्यानच्छिद्रेषु अभिव्यक्तेभ्यः प्रत्ययान्तराणि व्युत्थानरूपाणि भवन्तीत्यर्थः ॥ २७ ॥

ननु सत्यपि प्रसंख्याने व्युत्थानसंस्काराः कार्य्यायोत्तिष्ठन्ति चेत्, कस्तेषां हानोपाय इत्यत आह :—

हानमेषां क्लेशवदुक्तम् ॥ २८ ॥

अविद्यारागादिक्लेशाः क्रियायोगतनूकृताः तत्तत् अवसर-लब्धप्रसराः प्रसंख्यानदहनदग्धाः पुनश्चित्ते संस्कारं न प्रसुवते। एवं व्युत्थानसंस्कारा अपि विवेकख्यात्यपरिपाकदशायां प्रत्ययान्तराणि कुर्वाणाः परिपक्वप्रसंख्यानदहनदग्धात्मबीजभावा न प्रसवधर्माणो भवन्तीति "क्लेशवदेषां" "हानमुक्तं" वेदितव्यमित्यर्थः ॥ २८ ॥

एवं प्रसंख्यानेन व्युत्थानस्य निरोधमुक्त्वा प्रसंख्यानस्यापि निर्बीजयोगापेक्षया व्युत्थानरूपस्य निरोधोपायमाह :—

प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेक-
ख्यातेर्धर्ममेघः समाधिः ॥ २९ ॥

षड्विंशतितत्त्वान्यालोचयतः सत्त्वपुरुषान्यताख्यातिर्या जायते सर्वाधिष्ठातृत्वाद्यवान्तरफला तत् प्रसंख्यानम्, तत्रापि "अकुसीदस्य" कुत्सितेषु विषयेषु सीदतीति कुसीदो रागः तद्रहितस्य सर्वात्मना विवेकख्यातिरेव सन्ततिरूपो "धर्ममेघसंज्ञः" "समाधिः" भवति । स च खलु अशुक्लकृष्णं धर्मं कैवल्यफलं मेहति सिञ्चतीति धर्ममेघ इत्युच्यते । प्रसंख्याने वैराग्यात् धर्ममेघे सति परवैराग्योदयात् प्रसंख्यानस्य निरोधो भवतीति भावः ॥ २८ ॥

इमं क्रमं स्फुटयति :—

ततः क्लेशकर्मनिवृत्तिः ॥ ३० ॥

"ततो" धर्ममेघात् क्लेशानां पञ्चानां सवासनानां तन्मूलानां कर्मणां च निवृत्तिः भवतीत्यर्थः ॥ ३० ॥

तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याज्ज्ञे-
यमल्पम् ॥ ३१ ॥

आवृण्वन्ति चित्तमित्यावरणा रजस्तमोमयाः क्लेशकर्मरूपा मलाः सर्वे ते आवरणाश्च मलाश्च सर्वावरणमलाः तैः धर्ममेघध्यानेनापेतस्य "ज्ञानस्य" शुद्धबुद्धालोकस्य "आनन्त्यात्" "ज्ञेयं" चेतनाचेतनात्मकं सर्वम् "अल्पम्" एव भवति, यथा शरदि अभ्रेषघनादिमलापेते नभसि सर्वतः प्रद्योतमानप्रचण्डमार्त्तण्ड-प्रकाशपटले घटादयः प्रकाश्या अल्पा भवन्ति तद्वदत्यन्तनिर्मलस्य बुद्धिसत्त्वस्य प्रकाशस्य किं नाम यन्न गोचर इति भावः । सेयं धर्ममेघस्य परा काष्ठा दर्शिता, अत एव धर्मा, न च म्रियन्त

इति व्युत्पत्त्या। सर्वानेव ज्ञेयान् मेहति प्रकाशयत्यपि धर्ममेव इत्याह, अयमेव हि धर्ममेघपरिपाको ज्ञानप्रसादः करतलोल्लता-मलकवत्पुरुषं निर्दोषमपरोक्षीकुर्वन् निर्मलजलान्तर्मत्स्यानिव जड़ाविशुद्धप्रकृतिविकारदृश्यविषयान्तर्गताशुद्धिविनाशादिदोषान् प्रकटयन् चित्ततपस्विनो निर्बीजयोगाख्यनिधिमापादयन् पर-वैराग्यमित्युच्यते ॥ ३१ ॥

ननु इदं परवैराग्यं क्लेशान् समूलकाषं कषत् कुशलाकुशलांश्च कर्माशयान् समूलघातं निहन्तुमुत्सहतां, तथाऽपि गुणानां स्वतः परिणामशीलत्वात् तादृशमपि पुरुषं प्रति देहेन्द्रियाणि परिणाम-क्रमोऽनुवर्त्ततामिति तत्राह :—

ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्॥३२॥

"ततो" धर्ममेघफलीभूतपरवैराग्यात्मकानन्तज्ञानानन्तरं गुणानां भोगविवेकख्यातिरूपपुरुषार्थकरणात् प्राग् यः परिणा-मानां महदादिघटान्तानां सृष्टावानुलोम्येन, प्रलये घटः पृथिव्यां लीयते; पृथिव्यप्सु; आपस्तेजसि; इत्यादि प्रातिलोम्येन, च क्रम आसीत् तस्य परिसमाप्तिरेव तं पुरुषं प्रति "गुणानां," पुरुषार्थ-त्वादनागताध्वा हि पुरुषार्थो गुणानां प्रवर्त्तकस्तस्मिन् कृते गुणा न क्षणमपि स्थातुमुत्सहन्त इति भावः॥ ३२ ॥

क्रमशब्दार्थमाह :—

क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ॥३३॥

क्षणाः कलांशास्तेषु समाहितबुद्धिना क्रमो ज्ञेयः। तत्र "क्षणप्रतियोगी" "क्रम" इति स्वरूपनिर्देशः। क्षणौ प्रतियोगिनौ निरूपकौ यस्य स क्षणप्रतियोगी। एवं क्षणिकपरिणामक्रमो मन्तव्यः। तत्र प्रमाणमाह। "परिणामापरान्तनिर्ग्राह्यः" इति

मृदि पिण्डघटकपालचूर्णकणानां प्रत्यक्षपरिणामानां पूर्वान्तः पिण्ड अपरान्तः कण, इति पूर्वोत्तरावधिग्रहणेन क्रमो निश्चित्य ग्राह्यो भवति, पिण्डानन्तरं घट इति क्रमोऽत्र प्रत्यक्षः। क्वचित् सुरक्षितवस्त्रादौ पुराणतादर्शनेन पूर्वान्तनवत्वपरिणाम-मारभ्य क्षणे क्षणे पुराणतायाः सूक्ष्मतमसूक्ष्मतरसूक्ष्मस्थूलतर-स्थूलतमत्वेन जायमानाया भेदं ज्ञात्वा नवत्वानन्तरं सूक्ष्मतम-पुराणता तदनन्तरं सूक्ष्मतरपुराणतेति क्रमोऽनुमेय इत्यर्थः। नन्वयं क्रमः किमनित्येष्वेवास्ति उत नित्येष्वपीति प्रश्नश्चेदस्ति नित्ये-ष्वपीति वदामः। तत्र नित्या द्विविधाः। कूटस्थनित्याः पुरुषाः, परिणामिनित्या गुणाः। यस्मिन् धर्मिणि धर्मलक्षणा-वस्थाभिः परिणम्यमाने स्वरूपं न विहन्यते तत्परिणामिनित्यता तत्रानित्येषु बुद्ध्यादिषु धर्मिषु रागादिपरिणामक्रमस्य पूर्वान्त-भावेऽपि अपरान्तः पुरुषसाक्षात्कारोऽस्तीति क्रमः तेषु सावधिकः, गुणेषु परिणामिनित्येषु परिणामक्रमो निरवधिकः, मुक्तपुरुषान् प्रत्युपरमेऽपि बद्धान् प्रत्यविच्छेदात्। ननु सर्वे पुरुषा मुच्यन्ते न वा? आद्ये, प्रधाने परिणामः सावधिकः। द्वितीये, तत्त्वज्ञाना-विश्रम्भ इति। तत्राहुः साङ्ख्याचार्य्याः। अस्ति त्रिविधः प्रश्नः। एकान्तवचनीयः, विभज्यवचनीयः, अवचनीयश्चेति। तत्राद्यो यथा। किमयं सर्वजातो मरिष्यतीति प्रश्नः, स एकान्तेन वक्तव्यः मरिष्यत्येवेति। त्वया कृतस्तु द्वितीयः, स विभज्य वक्तव्यः, यस्य तत्त्वख्यातिः स मुच्यते नान्य इति। एवं च जन्तूनामानन्त्यात् पुराणादौ सर्गप्रलयानन्त्यश्रवणाच्च न सर्वमुक्तिः। तृतीयस्तु प्रधानपरिणामक्रमः समाप्यते नवेति प्रश्नः। अयमुत्तरानर्हः, अशक्यावधारणत्वात्। यद्वा, कुशलस्यान्तवान् संसारक्रमः अकुशलस्य नेति व्याकरणीयोऽयं प्रश्न इति। तस्मात् सदा परिणामिषु नित्येषु गुणेषु क्रमवत्परिणामभेदादस्ति क्रमः,

कूटस्थनित्येषु पुरुषेषु बुद्ध्यादिपरिणामभेदारोपात् कल्पितः क्रमो न वास्तव इति सर्वमवदातम् ॥ ३३ ॥

अधुना शास्त्रप्रतिपाद्ययोगफलं कैवल्यं दर्शयति :—

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥ ३४ ॥

कृतभोगापवर्गाणां कृतकृत्यानां बुद्ध्यादि "गुणानां" प्रातिलोम्येन प्रसवः व्युत्थानसमाधिपरवैराग्यसंस्कारा मनसि लीयन्ते, मनश्चास्मितायां लीयते, सा महति, महत्तत्वं गुणेष्विति प्रलयः तत् प्रधानस्य "कैवल्यं" पुरुषविशेष उपचर्यते। यद्वा, "चितिशक्तिः" चित्स्वभावा पुरुषव्यक्तिः स्वरूपमात्रेण प्रकर्षेण तिष्ठतीति "स्वरूपप्रतिष्ठा" पुनर्बुद्ध्याद्यनर्थेनात्यन्तिकवियोग इति यावत् तदिदं पुरुषस्य नित्यस्य निर्मलशुद्धासङ्गस्य प्रकाशस्य कैवल्यमिति रमणीयम्। सौत्र इतिशब्दः शास्त्रपरिसमाप्तिदर्शनार्थः ॥ ३४ ॥

यद्वागप्रणवप्रपत्तिदहनः सद्योऽन्तरायाटवीं
दग्ध्वा स्वात्मनि बोधदीपमचलं सूते तमःपाटनम् ।
यत्र न्यस्तसमस्तकर्म जनयेद्योगं तदङ्गं विना
वन्दे सिद्धिभुवं तमीशमनिशं कैवल्यदं राघवम् ॥ १ ॥

यत् प्रसादलवः सूते मोक्षाद्याः सर्वसम्पदः ।
उमाधवं महेशानं तं काशीनिलयं भजे ॥ २ ॥

फणीन्द्रसूत्रसंबद्धा व्यासवाङ्मणिभूषिता ।
महाङ् मौक्तिकी माला स्यात् सदा रामपादयोः ॥ ३ ॥

क्वाहं प्रमादनिरतः क्व वात्सल्यं गुरोरिदम् ।
नूनं महात्मनां दीने स्वतश्चित्तं कृपान्वितम् ॥ ४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्
पूज्यपादशिष्यश्रीरामानन्दसरस्वतीकृतौ सांख्य-
प्रवचने योगमणिप्रभायां कैवल्यपाद-
श्चतुर्थः समाप्तः ॥

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY
CALCUTTA

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE
LIBRARY